Bombay Sanskrit Series.

No. I.

PANCHATANTRA IV. & V.

sansk. 4.
616a.

Digitized by Google

BOMBAY SANSKRIT SERIES

No. I.

PANCHATANTRA IV. & V.

EDITED WITH NOTES

BY

G. BÜHLER, PH. D.

PROFESSOR OF ORIENTAL LANGUAGES, ELPHINSTONE COLLEGE.

BIBLIOTHECA BODLEIANA

Registered under Act XXXV. of 1857.

Bombay:
PRINTED AT THE "ORIENTAL PRESS."

1868.

Digitized by Google

Digitized by Google

LIST OF ERRATA IN THE TEXT.

P. 29. L. 23.—dele stop after भवन्ति.
P. 33. L. 10.—दशनेन read दशंनेन.
P. 36. L. 7.—तूर्णी read तूष्णीं.
P. 43. L. 20.—संपन्न read संपन्नं.
P. 45. L. 1.—आरभ्यते परी° read आरभ्यतेपरी°.
P. 47. L. 10.—आजन्मनः read आ जन्मनः.
P. 58. L. 18.—put a stop after प्रनष्टा:.
P. 60. L. 19.—त्वा read त्वां.
P. 67. L. 7.—शुद्धयति read शुध्यति.

Digitized by Google

Digitized by Google

अथेदमारभ्यते लब्धप्रणाशं नाम चतुर्थं तन्त्रं यस्यायमादिमः श्लोकः।

समुत्पन्नेषु कार्येषु बुद्धिर्यस्य न हीयते।
स एव दुर्गं तरति जलस्थो वानरो यथा ॥ १ ॥

तद्यथानुश्रूयते।

अस्ति कस्मिंश्चित्समुद्रोपकण्ठे महाञ्जम्बूपादपः सदाफलः। तत्र च रक्तमुखो नाम वानरः प्रतिवसति स्म। तत्र च तस्य तरोरधः कदाचित्करालमुखो नाम मकरः समुद्रसलिलान्निष्क्रम्य सुकोमल-वालुकासनाथे तीरोपान्ते निविष्टः। ततश्च रक्तमुखेन स प्रोक्तः। भो भवानभ्यागतोतिथिः। तद्भक्षयतु मया दत्तान्यमृतकल्पानि जम्बूफलानि। उक्तं च।

प्रियो वा यदि वा द्वेष्यो मूर्खो वा यदि पण्डितः।
वैश्वदेवान्तमासन्नः सोतिथिः स्वर्गसंक्रमः ॥ २ ॥
न पृच्छेच्चरणं गोत्रं न च विद्यां कुलं न च।
अतिथिं वैश्वदेवान्ते श्राद्धे च मनुरब्रवीत् ॥ ३ ॥
दूरमार्गश्रमश्रान्तं वैश्वदेवान्तमागतम्।
अतिथिं पूजयेद्यस्तु स याति परमां गतिम् ॥ ४ ॥

एवमुक्त्वा तस्य जम्बूफलानि प्रयच्छति। सोपि तानि भक्षयित्वा तेन सह चिरं गोष्ठीसुखमनुभूय भूयोपि स्वभवनमगात्। एवं नित्य-मेव तौ वानरमकरौ जम्बूच्छायाश्रितौ विविधशास्त्रगोष्ठ्या कालं नयन्तौ सुखेन तिष्ठतः। सोपि मकरो भक्षितशेषाणि जम्बूफलानि

Digitized by Google

गृहं गत्वा स्वपत्न्याः प्रयच्छति । अथान्यतमे दिवसे तया स पृष्टः। नाथ कैवंविधान्यमृतकल्पानि फलानि प्राप्नोति भवान् । स आह । भद्रे ममास्ति परमसुहृद्रक्तमुखो नाम वानरः । स प्रीतिपूर्वमिमानि फलानि प्रयच्छति नित्यम् । अथ तयाभिहितम् । यः सदैवामृतप्रायाणीदृशानि फलानि भक्षयति तस्य हृदयममृतमयं भविष्यति । तद्यदि मया भार्यया ते प्रयोजनं ततस्तस्य हृदयं मम प्रयच्छ येन तद्भक्षयित्वा जरामरणरहिता त्वया सह भोगान्भुनज्मि । स आह । भद्रे मा मैवं वद । यतः स प्रतिपन्नोस्माकं भ्राता । अपरं व्यापादयितुमपि न शक्यते । तत्त्यजैनं मिथ्याग्रहम् । उक्तं च ।

एकस्थाने प्रसूते वागन्यस्मिञ्जननी नृणाम् ।
वाग्जातमधिकं प्रोचुः सोदर्यादपि बान्धवात् ॥ ५ ॥

अथ मकर्याह । त्वया कदाचिदपि वचनं मम नान्यथा कृतम् । तन्नूनं सा वानरी भविष्यति यतस्तस्या अनुरागतः सकलमपि दिनं तत्र गमयसि । तत्त्वं ज्ञातः सम्यङ्मया । यतः ।

साह्लादं वचनं प्रयच्छसि न मे नो वाञ्छितं किंचन
प्रायः प्रोच्छ्वसिषि द्रुतं हुतवहज्वालासमं रात्रिषु ।
कण्ठाश्लेषपरिग्रहे शिथिलता यन्नादरश्चुम्बने
तत्ते धूर्त हृदि स्थिता प्रियतमा काचिन्ममैवापरा ॥ ६ ॥

सोपि पत्न्याः पादोपसंग्रहं कृत्वाङ्कोपरि निधाय तस्याः कोपकोटिमापन्नायाः पत्न्याः सुदीनमुवाच यत् ।

मयि ते पादपतिते किंकरत्वमुपागते ।
प्रिये कामातुरः कोपं कान्ते कोन्योपनेष्यति ॥ ७ ॥

Digitized by Google

सापि तद्वचनमाकर्ण्याश्रुप्लुतमुखी तमुवाच ।

सार्धं मनोरथशतैस्तव धूर्त कान्ता
सैव स्थिता मनसि कृत्रिमभावरम्या ।
अस्माकमस्ति न कथंचिदिहावकाश-
स्तस्मात्कृतं चरणपातविडम्बनाभिः ॥ ८ ॥

अपरं सा यदि तव वल्लभा न भवति तत्किं मया भणितेपि तं न व्यापादयसि । अथ यदि स वानरस्तत्कस्तेन सह महास्नेहः । तत्किं बहुना । यदि तस्य हृदयं न भक्षयामि तन्मया प्रायोपवेशनं कृतं विद्धि । एवं तस्यास्तन्निश्चयं ज्ञात्वा चिन्ताव्याकुलितचित्तः स प्रोवाच । अथवा साध्विदमुच्यते ।

वज्रलेपस्य मूर्खस्य नारीणां कर्कटस्य च ।
एको ग्रहस्तु मीनानां नीलीमद्यपयोस्तथा ॥ ९ ॥

तत्किं करोमि । कथं स मे वध्यो भविष्यति । इति विचिन्तयन्वानरपार्श्वमगमत् । वानरोपि चिरायान्तं तं सोद्वेगमवलोक्य प्रोवाच । भो मित्र किमत्र विरलवेलायां समायातः । कस्मात्साल्हादं नालापयसि न सुभाषितानि पठसि । स आह । मित्र अहं तव भ्रातृजायया निष्ठुरतरैर्वाक्यैरभिहितः । भोः कृतघ्न मा मे संमुखं मुखं दर्शय यतस्त्वं मित्रं नित्यमेवोपजीव्यागच्छसि तस्य पुनः प्रत्युपकारं गृहदर्शनमात्रेणापि न करोषि । तत्ते प्रायश्चित्तमपि नास्ति । उक्तं च ।

ब्रह्मघ्ने च सुरापे च चौरे भग्नव्रते तथा ।
निष्कृतिर्विहिता सद्भिः कृतघ्ने नास्ति निष्कृतिः ॥ १० ॥

तत्त्वं मम देवरं गृहीत्वाद्य प्रत्युपकारार्थं गृहमागच्छ । अथवा

Digitized by Google

त्वया सह मे परलोके दर्शनम्। तदहं तयैवं प्रोक्तस्तव सकाशमागतः। तदद्य तया सह कलहवत इयती वेला मे विलग्ना। तदागच्छ मे गृहम्। तव भ्रातृपत्नी रचितचतुष्का प्रगुणितमणिमाणिक्या द्वारदेशबद्धवन्दनमाला सोत्कण्ठा तिष्ठति। मर्कट आह। भो मित्र युक्तमभिहितं मद्भ्रातृपत्न्या। उक्तं च।

वर्जयेत्कौलिकाकारं मित्रं प्राज्ञतरो नरः।
आत्मनः संमुखं नित्यं य आकर्षति लोलुपः॥ ११॥

तथा च।

ददाति प्रतिगृण्हाति गुह्यमाख्याति पृच्छति।
भुङ्क्ते भोजयते चैव षड्विधं प्रीतिलक्षणम्॥ १२॥

परं वयं वनचराः। युष्मदीयं जलान्ते गृहं तत्कथमपि न शक्यते तत्र गन्तुम्। तस्मात्तामपि मे भ्रातृपत्नीमत्रानय येन तस्याः प्रणम्याशीर्वादं गृण्हामि। स आह। भो मित्र अस्ति समुद्रान्ते रम्ये पुलिनप्रदेशेस्मद्गृहम्। तन्मम पृष्ठमारूढः सुखेनाकृतभयो गच्छ। सोपि तच्छ्रुत्वा सानन्दमाह। भद्र यद्येवं तर्हि किं विलम्ब्यते। त्वर्यताम्। अहं तव पृष्ठमारूढः। तथानुष्ठिते गच्छन्तमगाधजले मकरमवलोक्य भयत्रस्तमना वानरः प्रोवाच। भ्रातः शनैःशनैर्गम्यताम्। जलकल्लोलैः प्लावितं मे शरीरम्। तदाकर्ण्य मकरश्चिन्तयामास। असावगाधं जलं प्राप्तो वशः संजातो मत्पृष्ठगतस्तिलमात्रमपि चलितुं न शक्नोति। तस्मात्कथयामि निजाभिप्रायं येनाभीष्टदेवतास्मरणं करोति। आह च। मित्र त्वं मया वधाय समानीतो भार्यावाक्याद्विश्वास्य। तत्स्मर्यतामभीष्टदेवता। स आह। भ्रातः किं मया तस्यास्तवापि चापकृतं येन मे वधोपाय-

Digitized by Google

श्चिन्तितः । मकर आह । भोस्तस्यास्तावत्तव हृदयस्यामृतमयरस-फलास्वादनामृष्यस्य भक्षणार्थं दोहदः संजातः । तेनैतदनुष्ठितम् । वानर आह । भद्र यद्येवं तत्किं त्वया मम तत्रैव न व्याहृतं येन स्वहृदयं जम्बूकोटरे सदैव मया सुगुप्तं कृतम् । तद्भ्रातृपत्न्या अर्पयामि । त्वयाहं शून्यहृदयोत्र कस्मादानीतः । तदाकर्ण्य मकरः सानन्दमाह । भद्र यद्येवं तदर्पय मे हृदयं येन सा दुष्टपत्नी तद्भक्षयित्वानशनादुत्तिष्ठति । अहं त्वा तमेव जम्बूपादपं प्रापयामि । एवमुक्त्वा निवर्त्य जम्बूतलमगात् । वानरोपि कथमपि जल्पित-विविधदेवतोपचारपूजस्तीरमासादितवान् । ततश्च दीर्घतरचङ्क्रमणेन तमेव जम्बूपादपमारूढश्चिन्तयामास । अहो लब्धाः प्राणास्तावत् । अथवा साध्विदमुच्यते ।

न विश्वसेदविश्वस्ते विश्वस्तेपि न विश्वसेत् ।
विश्वासाद्भयमुत्पन्नं मूलान्यपि निकृन्तति ॥ १३ ॥

तन्ममैतदन्यत्संततिदिनं संजातम् । इति चिन्तयानमनन्तरं मकर आह । भो मित्र अर्पय तद्धृदयं यथा ते भ्रातृपत्नी भक्षयित्वानशनादुत्तिष्ठति । अथ विहस्य निर्भर्त्सयन्वानरस्तमाह । धिङ्मूर्ख विश्वासघातक किं कस्यचिद्धृदयद्वयं भवति । तद्गम्यताम् । जम्बूवृक्षस्याधस्तान्न भूयोपि त्वयात्रागन्तव्यम् ।

उक्तं च यतः ।

सकृद्दुष्टं च यो मित्रं पुनः संधातुमिच्छति ।
स मृत्युमुपगृह्णाति गर्भमश्वतरी यथा ॥ १४ ॥

तच्छ्रुत्वा मकरः सविलक्षं चिन्तितवान् । अहो मयातिमूढेन किमस्य स्वचित्ताभिप्रायो निवेदितः । तद्यद्यसौ पुनरपि कथंचिद्वि-

Digitized by Google

श्वासं गच्छति तद्भूयोपि विश्वासयामि । आह च । मित्र हास्येन मया तेभिप्रायो लब्धः । तस्या न किंचित्तव हृदयेन प्रयोजनम् । तदागच्छ प्राघूर्णकन्यायेनास्मद्गृहम् । ते भ्रातृपत्नी सोत्कण्ठा वर्तते । वानर आह । भो दुष्ट गम्यताम् । अधुना नाहमागमिष्यामि ।

उक्तं च ।

बुभुक्षितः किं न करोति पापं
क्षीणा नरा निष्करुणा भवन्ति ।
आख्याहि भद्रे प्रियदर्शनस्य
न गङ्गदत्तः पुनरेति कूपम् ॥ १५ ॥

मकर आह । कथमेतत् । स आह ।

कथा 2.

अस्ति कस्मिंश्चित्कूपे गङ्गदत्तो नाम मण्डूकराजः प्रतिवसति स्म । स कदाचिद्दायादैरुद्वेजितोरघट्टघटीमारुह्य निष्क्रान्तः । अथ तेन चिन्तितम् । यत्कथं तेषां दायादानां मया प्रत्यपकारः कर्तव्यः । उक्तं च ।

आपदि येनापकृतं येन च हसितं दशासु विषमासु ।
अपकृत्य तयोरुभयोः पुनरपि जातं नरं मन्ये ॥ १६ ॥

एवं चिन्तयन्बिले प्रविशन्तं कृष्णसर्पमपश्यत् । तं दृष्ट्वा भूयोप्यचिन्तयत् । यदेनं तत्र कूपे नीत्वा सकलदायादानामुच्छेदं करोमि । उक्तं च ।

शत्रुभिर्योजयेच्छत्रुं बलिना बलवत्तरम् ।
स्वकार्याय यतो न स्यात्काचित्पीडात्र तत्क्षये ॥ १७ ॥

Digitized by Google

तथा च ।

शत्रुमुन्मूलयेत्प्राज्ञस्तीक्ष्णं तीक्ष्णेन शत्रुणा ।
व्यथाकरं सुखार्थाय कण्टकेनेव कण्टकम् ॥ १८ ॥

स एवं परिभाव्य बिलद्वारं गत्वा तमाहूतवान् । एह्येहि प्रियदर्शन एहि । तच्छ्रुत्वा सर्पश्चिन्तयामास । एष मामाह्वयति । स स्वजात्यो न भवति यतो नैषा सर्पवाणी । अन्येन केनापि सह मम मर्त्यलोके संधानं नास्ति । तदत्रैव दुर्गे स्थितस्तावद्वेद्मि कोयं भविष्यति । उक्तं च ।

यस्य न ज्ञायते शीलं न कुलं न च संश्रयः ।
न तेन संगतिं कुर्यादित्युवाच बृहस्पतिः ॥ १९ ॥

आः कदाचित्कोपि मन्त्रवान्मोषधिधरो वा मामाहूय बन्धने क्षिपति । अथवा कश्चित्पुरुषो वैरमाश्रित्य कस्यचिद्भक्षणार्थे मामाह्वयति । आह च । भोः को भवान् । स आह । अहं गङ्गदत्तो नाम मण्डूकाधिपतिस्त्वत्सकाशे मैत्र्यर्थमागतः । तच्छ्रुत्वा सर्प आह । भो अश्रद्धेयमेतद्यत्तृणानां वन्हिना सह संगमः । उक्तं च ।

यो यस्य जायते वध्यः स स्वप्नेपि कथंचन ।
न तत्समीपमभ्येति तत्किमेवं प्रजल्पसि ॥ २० ॥

गङ्गदत्त आह । भोः सत्यमेतत् । स्वभाववैरी त्वमस्माकम् । परं परपरिभवात्प्राप्तोहं ते सकाशम् । उक्तं च ।

सर्वस्वनाशे संजाते प्राणानामपि संशये ।
अपि शत्रुं प्रणम्यापि रक्षेत्प्राणधनानि च ॥ २१ ॥

सर्प आह । कथय कस्मात्ते परिभवः स आह । दायादेभ्यः ।

Digitized by Google

सोऽप्याह । क्व त आश्रयो वाप्यां कूपे तडागे ह्रदे वा । तत्कथय स्वाश्रयम् । तेनोक्तम् । पाषाणचयनिबद्धे कूपे । सर्प आह । अहो अपदा वयम् । तर्हि नास्ति मम तत्र प्रवेशः । प्रविष्टस्य च तत्र स्थानं नास्ति यत्र स्थितस्तव दायादान्व्यापादयामि । तद्गम्यताम् ।

उक्तं च ।

यच्छक्यं ग्रसितुं शस्यं ग्रस्तं परिणमेच्च यत् ।
हितं च परिणामे यत्तदाद्यं भूतिमिच्छता ॥ २२ ॥

गङ्गदत्त आह । भोः समागच्छ त्वम् । अहं सुखोपायेन तत्र तव प्रवेशं कारयिष्यामि । तथा तस्य मध्ये जलोपान्ते रम्यतरं कोटरमस्ति । तत्र स्थितस्त्वं लीलया दायादान्व्यापादयिष्यसि । तच्छ्रुत्वा सर्पो व्यचिन्तयत् । अहं तावत्परिणतवयाः । कदाचित्कथंचिन्मूषकमेकं प्राप्नोमि । तत्सुखावहो जीवनोपायोयमनेन कुलाङ्गारेण मे दर्शितः । तद्गत्वा तान्मण्डूकान्भक्षयामीति ।

अथवा साध्विदमुच्यते ।

यो हि प्राणपरिक्षीणः सहायपरिवर्जितः ।
स हि सर्वसुखोपायां वृत्तिमावरयेद्बुधः ॥ २३ ॥

एवं विचिन्त्य तमाह । भो गङ्गदत्त यद्येवं तदग्रे भव येनागच्छामि गङ्गदत्त आह । भोः प्रियदर्शन अहं त्वां सुखोपायेन तत्र नेष्यामि स्थानं च दर्शयिष्यामि । परं त्वयास्मत्परिजनो रक्षणीयः । केवलं यानहं दर्शयामि त्वया त एव भक्षणीया इति । सर्प आह । सांप्रतं त्वं मे मित्रं जातम् । तन्न मेतव्यम् । तव वचनेन भक्षणीयास्ते दायादाः । एवमुक्त्वा बिलान्निष्क्रम्य तमालिङ्ग्य च तेनैव सह प्रस्थितः । अथ कूपमासाद्यारघट्टघटिकामार्गेण सर्पस्तेना-

Digitized by Google

त्मना स्वालयं नीतः। ततश्च गङ्गदत्तेन कृष्णसर्पं कोटरे धृत्वा दर्शितास्ते दायादाः। ते च तेन शनैःशनैर्भक्षिताः। अथ मण्डूकाभावे सर्पेणाभिहितम्। भद्र निःशेषितास्ते रिपवस्तत्प्रयच्छान्यन्मे किंचिद्भोजनं यतोहं त्वयात्रानीतः। गङ्गदत्त आह। भद्र कृतं त्वया मित्रकृत्यम्। तत्सांप्रतमनेनैव घटिकायन्त्रमार्गेण गम्यतामिति। सर्प आह। भो गङ्गदत्त न सम्यगभिहितं त्वया। कथमहं तत्र गच्छामि। मदीयबिलदुर्गमन्येन विरुद्धं भविष्यति। तस्मादत्रस्थस्य मे मण्डूकमेकैकं स्ववर्गीयं प्रयच्छ नो चेत्सर्वानपि भक्षयिष्यामीति। तच्छ्रुत्वा गङ्गदत्तो व्याकुलमना व्यचिन्तयत्। अहो किमेतन्मया कृतं सर्पमानयता। तद्यदि निषेधयिष्यामि तत्सर्वानपि भक्षयिष्यति। अथवा युक्तमुच्यते।

अमित्रं कुरुते मित्रं वीर्याभ्यधिकमात्मनः।
स करोति न संदेहः स्वयं हि विषभक्षणम्॥ २४॥

तत्प्रयच्छाम्यस्यैकं दिनं प्रति सुहृदम्। उक्तं च।

सर्वस्वहरणे युक्तं शत्रुं बुद्धियुता नराः।
तोषयन्त्यल्पदानेन वाडवं सागरो यथा॥ २५॥

तथा च।

यो दुर्बलो ह्यप्यधिकं याच्यमानो
बलीयसा यच्छति नैव साम्ना।
प्रयच्छते नैव च दर्श्यमानं
खारीं स चूर्णस्य पुनर्ददाति॥ २६॥

तथा च।

सर्वनाशे समुत्पन्ने अर्धं त्यजति पण्डितः।

Digitized by Google

अर्धेन कुरुते कार्यं सर्वनाशो हि दुस्तरः ॥ २७ ॥

एवं निश्चित्य नित्यमेकैकमादिशति । सोपि तं भक्षयित्वा तस्य परोक्षेन्यानपि भक्षयति । अथवा साध्विदमुच्यते ।

यथा हि मलिनैर्वस्त्रैर्यत्र तत्रोपविश्यते ।
एवं चलितवृत्तस्तु वृत्तशेषं न रक्षति ॥ २८ ॥

अथान्यदिने तेनापरान्मण्डूकान्भक्षयित्वा गङ्गदत्तसुतः पृथुदत्तो भक्षितः । तं भक्षितं मत्वा गङ्गदत्तस्तारस्वरेण धिग्धिक्प्रलापपरः कथंचिदपि न विरराम । ततः पत्न्याभिहितः ।

किं क्रन्दसि दुराक्रन्द स्वपक्षक्षयकारक ।
स्वपक्षस्य क्षये जाते त्वत्त्राणं कः करिष्यति ॥ २९ ॥

तदद्यापि विचिन्त्यतामात्मनो निष्क्रमणमस्य वधोपायश्च । अथ गच्छता कालेन सकलमपि कवलितं मण्डूककुलम् । केवलमेको गङ्गदत्तस्तिष्ठति । ततः प्रियदर्शनेन भणितम् । भो गङ्गदत्त बुभुक्षितोहम् । निःशेषिताः सर्वे मण्डूकाः । तद्दीयतां मे किंचिद्भोजनं यतोहं त्वयात्रानीतः । स आह । भो मित्र न त्वयात्र विषये मयावस्थितेन कापि चिन्ता कार्या । तदहि मां प्रेषयसि ततोन्यकूपकानामपि मण्डूकानाश्वास्यात्रानयामि । स आह । मम तावत्त्वमभक्ष्यो भ्रातृस्थाने । तद्यद्येवं करोषि तत्साम्प्रतं पितृस्थाने भवसि । तदेवं क्रियतामिति । सोपि तदाकर्ण्यारघट्टघटिकामाश्रित्य विविधदेवतोपकल्पितोपयाचितोस्मात्कूपाद्विनिष्क्रान्तः । प्रियदर्शनोपि तदाकाङ्क्षया तत्रस्थः प्रतीक्षमाणस्तिष्ठति । अथ चिरादनागते गङ्गदत्ते प्रियदर्शनोन्यकोटरनिवासिनीं गोधामुवाच । भद्रे क्रियतां स्तोकं साहाय्यम् । त्वया सह परिचितमास्ते । तद्गत्वा

Digitized by Google

मण्डूकमन्विष्य क्वचिज्जलाशये गङ्गदत्ताय मम संदेशं कथय। येनागम्यतामेकाकिनापि द्रुततरं यद्यन्ये मण्डूका नागच्छन्ति। अहं त्वया विना नात्र वस्तुं शक्नोमि। तथा यद्यहं तव विरुद्धमाचरामि तत्सुकृतमन्तरे मया विधृतम्। गोधापि तद्वचनाद्गङ्गदत्तं द्रुततरमन्विष्याह। भद्र गङ्गदत्त स तव सुहृत्प्रियदर्शनस्तव मार्गं समीक्षमाणस्तिष्ठति। तच्छीघ्रं गम्यतामिति। अपरं च तेन तव विरूपकरणे सुकृतमन्तरे धृतम्। तन्निःशङ्केन मनसा गम्यताम्। तदाकर्ण्य गङ्गदत्त आह।

बुभुक्षितः किं न करोति पापं
क्षीणा नरा निष्करुणा भवन्ति।
आख्याहि भद्रे प्रियदर्शनस्य
न गङ्गदत्तः पुनरेति कूपम्॥ ३०॥

एवमुक्त्वा स तां विसर्जयामास।

तद्गो दुष्टजलचर। अहमपि गङ्गदत्त इव कथंचिद्दृष्टापायोपि त्वद्गृहं न यास्यामि। तच्छ्रुत्वा मकर आह। भो मित्र नैतदुज्यते ते कर्तुम्। सर्वथैव मे कृतघ्नतादोषमपनय मद्गृहागमनेन। अथवात्राहमनशनात्प्राणत्यागं तवोपरि करिष्यामि। वानर आह। मूढ किमहं लम्बकर्णो गर्दभो यो दृष्टापायमपि स्वयमेव तत्रैव गत्वा मृतः।

आगतश्च गतश्चैव दृष्ट्वा सिंहपराक्रमम्।
अकर्णहृदयो मूर्खस्तेन मृत्युवशं गतः॥ ३१॥

मकर आह। भद्र स को लम्बकर्णो गर्दभः। कथं दृष्टापायोपि मृतः। तन्मे निवेद्यताम्। वानर आह।

Digitized by Google

कथा २.

अस्ति कस्मिंश्चिद्वनोद्देशे करालकेसरो नाम सिंहः प्रतिवसति स्म । तस्य च धूसरको नाम शृगालः सदैवानुयायी परिचारकोस्ति । अथ कदाचित्तस्य हस्तिना सह युध्यमानस्य शरीरे प्रहाराः संजाता यैः पदमेकमपि चलितुं न शक्नोति । तस्याचलनाच्च धूसरकः क्षुत्क्षामकण्ठो दौर्बल्यं गतः । अन्यस्मिन्नहनि तमवोचत् । स्वामिन् बुभुक्षया पीडितोहं पदात्पदमपि चलितुं न शक्नोमि । तत्कथं ते शुश्रूषां करोमि । सिंह आह । भो गच्छान्वेषय किंचित्सत्त्वं येनेमामवस्थां गतोपि व्यापादयामि । तदाकर्ण्य शृगालोन्वेषयन्कंचित्समीपवर्तिनं ग्राममासादितवान् । तत्र लम्बकर्णो नाम गर्दभस्तडागोपान्ते प्रविरलदूर्वाङ्कुरान्कृच्छ्रादास्वादयन्दृष्टः । ततश्च समीपीभूय तेनाभिहितः । माम नमस्कारोयं मदीयः संभाव्यताम् । चिरादृष्टोसि । तत्किमेवं दुर्बलः । स आह । भगिनीसुत किं कथयामि । रजकोतिनिर्दयोतिभारेण मां दमयति । घासमुष्टिमपि न प्रयच्छति । केवलं दूर्वाङ्कुरान्धूलिमिश्रितान्भक्षयामि । तत्कुतो मे शरीरे पुष्टिः । शृगाल आह । माम यद्येवं तदस्ति रमणीयतरप्रदेशो मरकतसदृशशष्पप्रायो नदीसनाथः । तदागच्छ मया सह येन सुखेन सुभाषितगोष्ठीसुखमनुभवावः । लम्बकर्ण आह । भो भगिनीसुत युक्तमुक्तं भवता । परं वयं ग्राम्याः पशवोरण्यचारिणां वध्यास्तत्किं तेन भव्यप्रदेशेन । शृगाल आह । माम मैवं वद । मद्भुजपरिरक्षितः स देशो । नास्ति कश्चित्तत्र परः ।

Digitized by Google

परमनेनैव द्रोषेण रजककदर्थितास्तत्र तिस्रो रासभ्योनाथाः सन्ति। ताश्च पुष्टिमापन्ना यौवनोत्कटा इदं मामूचुः। यदि त्वमस्माकं सत्यो मातुलस्तदा किंचिद्ग्रामान्तरं गत्वास्मद्योग्यं कंचित्पतियानय। तदर्थे त्वामहं तत्र नयामि। अथ शृगालवचनानि श्रुत्वा कामपीडिताङ्गस्तमवोचत्। भद्र यद्येवं तदग्रे भव येनागच्छामि। अथवा साध्विदमुच्यते।

नामृतं न विषं किंचिदेकां मुक्त्वा नितम्बिनीम्।
यस्याः सङ्गेन जीव्येत त्रिवेत च वियोगतः॥ ३२॥

तथा च।

यासां नाभ्यादि कामः स्यात्संगमं दर्शनं विना।
तासां दृक्संगमं प्राप्य यन्न द्रवति कौतुकम्॥ ३३॥

तथानुष्ठिते शृगालेन सह सिंहान्तिकमागतः। सिंहोपि व्यथाकुलस्तं दृष्ट्वा यावत्समुत्तिष्ठति तावद्रासभः पलायितुमारब्धः। अथ तस्य पलायमानस्य सिंहेन तलप्रहारो दत्तः। स च मन्दभाग्यस्य व्यवसाय इव व्यर्थतां गतः। अत्रान्तरे शृगालः कोपाविष्टस्तमुवाच। भोः किमेवंविधः प्रहारस्ते। यद्गर्दभोपि तव पुरतो बलाद्रच्छति। तत्कथं गजेन सह युद्धं करिष्यसि। तदृष्टं ते बलम्। अथ विलक्षस्मितं सिंह आह। भोः किमहं करोमि। मया न क्रमः सज्जीकृत आसीत्। अन्यथा गजोपि मत्क्रमाक्रान्तो न गच्छति। शृगाल आह। अद्याप्येकवारं त्वान्तिके तमानेष्यामि। परं त्वया सज्जीकृतक्रमेण स्थातव्यम्। सिंह आह। यो मां प्रत्यक्षतया दृष्ट्वा गतः स पुनः कथमत्रागमिष्यति। तदन्यत्किमपि सत्त्वमन्विष्यताम्। शृगाल आह। किं तवानेन व्यापारेण। त्वं केवलं

Digitized by Google

सज्जितक्रमस्तिष्ठ । तथानुष्ठिते शृगालोपि यावद्रासभमार्गेण गच्छति तावत्तत्रैव स्थाने चरन्दृष्टः । अथ शृगालं दृष्ट्वा रासभः प्राह । भो भगिनीसुत शोभनस्थाने त्वयाहं नीतः । द्वाङ्मृत्युवक्त्रं गतः । तत्कथय किं तत्सत्त्वं यस्यातिरौद्रवज्रसदृशकरप्रहारादहं मुक्तः । तच्छ्रुत्वा प्रहसञ्छृगाल आह । भद्र रासभी त्वामायान्तं दृष्ट्वा सानुरागालिङ्गितुं समुत्थिता । त्वं च कातरत्वान्नष्टः । सा पुनर्न शक्ता त्वां विना स्थातुम् । तया तु नश्यतस्तेवलम्बनार्थं हस्तः क्षिप्तो नान्यकारणेन । तदागच्छ । सा त्वत्कृते प्रायोपवेशन उपविष्टा तिष्ठति । एतद्वदति । यल्लम्बकर्णो यदि मे भर्ता न भवति तदहमग्नौ जले वा प्रविशामि विषं वा भक्षयामि । पुनस्तस्य वियोगं सोढुं न शक्नोमि । तत्प्रसादं कृत्वा तत्रागम्यतामिति । नो चेत्तव स्त्रीहत्या भविष्यति । अपरं च भगवान्कामः कोपं तव करिष्यति । उक्तं च ।

स्त्रीमुद्रां मकरकेतनस्य महतीं सर्वार्थसंपत्करीं
ये मूढाः प्रविहाय यान्ति कुधियो मिथ्याफलान्वेषिणः ।
ते तेनैव निहत्य निर्दयतरं नग्नीकृता मुण्डिताः
केचिद्वल्कपटीकृताश्च जटिलाः कापालिकाश्चापरे ॥ ३४ ॥

अथासौ तद्वचनं श्रद्धेयतया श्रुत्वा भूयोपि तेन सह प्रस्थितः । अथवा साध्विदमुच्यते ।

जानन्नपि नरो दैवात्करोति विगर्हितम् ।
कर्म किं कस्यचिल्लोके गर्हितं रोचते कथम् ॥ ३५ ॥

अत्रान्तरे सज्जितक्रमेण सिंहेन स लम्बकर्णो व्यापादितः । ततस्तं हत्वा शृगालं रक्षपालं निरूप्य स्वयं स्नानार्थं नद्यां गतः ।

Digitized by Google

शृगालेनापि लौल्यौत्सुक्यात्तस्य कर्णहृदयं भक्षितम् । अत्रान्तरे सिंहो यावत्स्नात्वा कृतदेवार्चनः प्रतर्पितपितृगणः समायाति तावत्कर्णहृदयरहितो रासभस्तिष्ठति । तं दृष्ट्वा कोपपरीतात्मा सिंहः शृगालमाह । आः पाप किमिदमनुचितं कर्म समाचरितं यदस्य कर्णसहितं हृदयं भक्षितम् । शृगाल आह । स्वामिन् मा मैवं वद यत्कर्णहृदयरहितोयं रासभ आसीत् । तेनेहागत्य त्वामवलोक्य भूयोप्यागतः । अथ तद्वचनं श्रद्धेयं श्रुत्वा सिंहस्तेनैव सह संविभज्य निःशङ्कितमनास्तं भक्षितवान् ।

अतोहं ब्रवीमि ।

आगतश्च गतश्चैव दृष्ट्वा सिंहपराक्रमम् ।
अकर्णहृदयो मूर्खस्तेन मृत्युवशं गतः ॥ ३६ ॥

तन्मूर्ख कपटं कृतं त्वया । परं युधिष्ठिरेणैव सत्यवचनेन विनाशितम् । अथवा साध्विदमुच्यते ।

स्वार्थमुत्सृज्य यो दम्भी सत्यं ब्रूते स मन्दधीः ।
स स्वार्थाद्भ्रश्यते नूनं युधिष्ठिर इवापरः ॥ ३७ ॥

मकर आह । कथमेतत् । स आह ।

कथा ३.

कस्मिंश्चिदधिष्ठाने कुम्भकारः प्रतिवसति स्म । स कदाचित्प्रमादोर्ध्वभ्रमकर्परतीक्ष्णाग्रस्योपरि महता वेगेन धावन्पतितः । ततः कर्परकोट्या पाटितललाटो रुधिरप्लाविततनुः कृच्छ्रादुत्थाय स्वाश्रयं गतः । ततश्चापथ्यसेवनात्स प्रहारस्तस्य करालतां गतः कृच्छ्रेण नीरोगतां नीतः । अथ कदाचिद्दुर्भिक्षपीडिते देशे स कुम्भकारः

Digitized by Google

क्षुत्क्षामकण्ठः कैश्चिद्राजसेवकैः सह देशान्तरं गत्वा कस्यापि राज्ञः सेवको बभूव । सोपि राजा तस्य ललाटे विकरालं प्रहारक्षतं दृष्ट्वा चिन्तयामास । गम्भीरः पुरुषः कश्चिदयम् । नूनं तेन ललाटपट्टे संमुखप्रहारः । अतस्तं सम्मानादिभिः सर्वेषां राजपुत्राणां सकाशाद्विशेषप्रसादेन पश्यति । तेपि राजपुत्रास्तस्य तं प्रसादातिरेकं पश्यन्तः परमेर्ष्याधमं वहन्तो राजभयान्न किंचिदूचुः । अथान्यस्मिन्नहनि तस्य भूपतेर्वीरसंभावनायां क्रियमाणायां विग्रहे समुपस्थिते प्रकल्प्यमानेषु गजेषु संनह्यमानेषु वाजिषु योधेषु प्रगुणीक्रियमाणेषु तेन भूभुजा स कुलालः प्रस्तावानुगतं पृष्टो निर्व्यञ्जने । यद्वो राजपुत्र कस्मिन्संग्रामे प्रहारोयं ललाटे लग्नः । स आह । देव नायं शस्त्रप्रहारः । कुलालोहं प्रकृत्या । मद्गेहेनेककर्पराण्यासन् । अथ कदाचिन्मद्यपानं कृत्वा निर्गतः प्रधावन्कर्परोपरि पतितः । तस्य प्रहारविकारोयं मे ललाट एवं विकरालतां गतः । तदाकर्ण्य राजा सव्रीडमाह । अहो वञ्चितोहं राजपुत्रानुकारिणानेन कुलालेन । तद्गीयतां द्रागेतस्य चन्द्रार्धः । तथानुष्ठिते कुम्भकार आह । मा मैवं कुरु । पश्य मे रणे हस्तलाघवम् । राजा प्राह । भोः सर्वगुणसंपन्नो भवान् । तथापि गम्यताम् । उक्तं च ।

शूरश्च कृतविद्यश्च दर्शनीयोसि पुत्रक ।
यस्मिन्कुले त्वमुत्पन्नो गजस्तत्र न हन्यते ॥ ३८ ॥

कथा ४.

कुलाल आह । कथमेतत् । राजा प्राह । कस्मिंश्चिद्वनोद्देशे सिंहदंपती प्रतिवसतः स्म । अथ सिंही पुत्रद्वयमजीजनत् । सिंहो-

Digitized by Google

पि नित्यमेव मृगान्व्यापाद्य सिंह्या ददाति । अथ कदाचित्तेन किमपि नासादितम् । वने भ्रमतोपि तस्य रविरस्तंगतः । अथ तेन स्वगृहमागच्छता शृगालशिशुः प्राप्तः । स च बालकोयमिति मत्वा यत्नेन दंष्ट्रामध्यगतं कृत्वा सिंह्या जीवन्तमपि समर्पितवान् । ततः सिंह्याभिहितम् । भोः कान्त आनीतं किंचिदस्माकं भोजनम् । सिंह आह । प्रिये मयाद्यैनं शृगालशिशुं परित्यज्य न किंचित्सत्त्वमासादितम् । स च मया बालोयमिति मत्वा न व्यापादितः । उक्तं च ।

स्त्रीलिङ्गिविप्रबालानां प्रहर्तव्यं न कर्हिचित् ।
प्राणत्यागेपि संजाते विश्वस्तानां विशेषतः ॥ ३९ ॥

इदानीमेनं भक्षयित्वा पथ्यं कुरु । प्रभातेन्यदुपार्जयिष्यामि । साह । भोः कान्त त्वया बालकोयमिति मत्वा न व्यापादितः । तदहं कथं स्वोदरार्थे व्यापादयामि । उक्तं च ।

अकृत्यं नैव कृत्यं स्यात्प्राणत्यागेपि संस्थिते ।
न च कृत्यं विमुञ्चेत एष धर्मः सनातनः ॥ ४० ॥

तस्मान्ममायं तृतीयः पुत्रो भविष्यति । इत्युक्त्वा तमपि स्वस्तनक्षीरेण पुष्टिमनयत् । एवं ते त्रयोपि शिशवः परस्परमज्ञातजातिविशेषा एकत्र विहारिणो बाल्यमतिवाहयन्ति । अथ कदाचित्तत्र वने भ्राम्यन्वनगजो दृष्टः । तं दृष्ट्वा तौ सिंहसुतौ द्वावपि कुपिताननौ तं प्रति प्रचलितौ यावत्तावत्तेन शृगालसुतेनाभिहितम् । अहो गजोयं युष्मत्कुलशत्रुः । तन्न गन्तव्यमेतस्याभिमुखम् । एवमुक्त्वा गृहं प्रधावितः । तावपि ज्येष्ठत्रासान्निरुत्साहतां गतौ । अथवा साध्विदमुच्यते ।

Digitized by Google

एकेनापि सुधीरेण सोत्साहेन रणं प्रति ।
सोत्साहं जायते सैन्यं भग्ने भङ्गमवाप्नुयात् ॥ ४१ ॥
अत एव हि वाञ्छन्ति भूपा योधान्महाबलान् ।
शूरान्धीरान्कृतोत्साहान्वर्जयन्ति च कातरान् ॥ ४२ ॥

ततो द्वावपि पित्रोरग्रतो विहसन्तौ ज्येष्ठभ्रातृचेष्टितमूचतुर्यथा गजं दृष्ट्वा दूरतोपि नष्टः । सोपि तदाकर्ण्य कोपाविष्टः प्रस्फुरिताधरपल्लवस्ताम्रलोचनस्त्रिशिखीं भृकुटीं कृत्वा तौ निर्भर्त्सयन्परुषतरवचनान्युवाच । ततः सिंह्यैकान्ते नीत्वा प्रबोधितः । वत्स मैवं कदाचिज्जल्प भवदीयलघुभ्रातरावेतौ । अथासौ प्रभूतकोपाविष्टस्तामित्युवाच । किमहमेताभ्यां शौर्यरूपेण विद्याभ्यासेन वा न्यूनो येन मामुपहसतः । तन्मयावश्यमेतौ व्यापादनीयौ । तदाकर्ण्य सिंही तस्य जीवितमिच्छन्ती प्राह ।

शूरोसि कृतविद्योसि दर्शनीयोसि पुत्रक ।
यस्मिन्कुले त्वमुत्पन्नो गजस्तत्र न हन्यते ॥ ४३ ॥

परं शृगालसुतस्त्वं कृपया मया स्वकीयक्षीरपानेन पुष्टिं नीतः । तद्यावन्नैतौ त्वां शृगालं जानीतस्तावद्द्रुतं गत्वा स्वजातिमध्ये भव । नो चेदाभ्यां हतो मृत्युपथं समेष्यसि । सोपि तद्वचनं श्रुत्वा भयव्याकुलमनाः क्षणात्प्रनष्टः ।

तस्मात्त्वमपि यावदेते राजपुत्रास्त्वां कुलालं न जानन्ति तावद्द्रुततरं गच्छ । नो चेदेतेषां सकाशाद्विडम्बनां प्राप्स्यसि । कुक्कालोपि तदाकर्ण्य द्रुततरं प्रनष्टः ।

अतोहं ब्रवीमि । युधिष्ठिर इव सत्यवचनात्त्वं तामापदमापन्नः । तद्धो दुष्टमकर त्वमपि कुलालवत्स्ववचनेन प्रकटीकृतः । उक्तं च ।

Digitized by Google

आत्मनो मुखदोषेण बध्यन्ते शुकसारिकाः ।
बकास्तत्र न बध्यन्ते मौनं सर्वार्थसाधनम् ॥ ४४ ॥

उक्तं च ।

सुगुप्तं रक्ष्यमाणोपि दर्शयन्दारुणं वपुः ।
व्याघ्रचर्मप्रतिच्छन्नो वाकृते रासभो हतः ॥ ४५ ॥

मकर आह । कथमेतत् । स आह ।

कथा ६.

अस्ति कस्मिंश्चिदधिष्ठाने शुद्धपटो नाम रजकः प्रतिवसति स्म । तस्यैको रासभोस्ति । सोपि घासाभावादतिदुर्बलः । अथ तेन रजकेन क्वापि व्याघ्रचर्म प्राप्तम् । ततश्चाचिन्तयत् । अहो शोभनमापतितम् । एतच्चर्म परिधाप्य रासभं रात्रौ यावत्क्षेत्रेषूत्सृजामि येन व्याघ्रं मत्वा समीपवर्तिनः क्षेत्रान्न निष्कासयन्ति । तथानुष्ठिते रासभो रात्रौ यथेच्छया यवभक्षणं करोति । रात्रिशेषेपि भूयो रजकः स्वाश्रयं नयति । एवं गच्छता कालेन स रासभः पीवरतनुर्जातः । कृच्छ्राद्वन्धनमपि नीयते । अथान्यस्मिन्नहनि स मदोद्धतो दूराद्रासभीशब्दं शृण्वंस्तारस्वरेण शब्दायितुमारब्धः । अत्र ते क्षेत्रपा रासभोयं व्याघ्रचर्मप्रतिच्छन्न इति मत्वा लकुटपाषाणशरप्रहारैस्तं व्यापादितवन्तः ।

अतोहं ब्रवीमि ।

सुगुप्तं रक्ष्यमाणोपि दर्शयन्दारुणं वपुः ।
व्याघ्रचर्मप्रतिच्छन्नो वाकृते रासभो हतः ॥ ४६ ॥

तत्किं श्यामलकवदत्यपमानसहनादर्धचन्द्रदानेन यास्यसि । मकर आह । कथमेतत् । स प्राह ।

Digitized by Google

कथा ६.

अस्त्यत्र धरापीठे विकण्टकं नाम पुरम् । तत्र महाधन ईश्वरो नाम भाण्डपतिः । तस्य चत्वारो जामातृका अवन्तीपीठात्साधूर्णका विकण्टकपुरे समायाताः । ते च तेन महता गौरवेणाभ्यर्चिता भोजनाच्छादनादिभिः । एवं तेषां तत्र वसतां मासषट्कं संजातम् । तत ईश्वरेण स्वभार्योक्ता । यदेते जामातरः परमगौरवेणार्जिताः स्वानि गृहाणि न गच्छन्ति । तत्किं कथ्यते । विनापमानं न यास्यन्ति । तदद्य भोजनवेलायां पादप्रक्षालनार्थं जलं न देयं येनापमानं ज्ञात्वा परित्यज्य गच्छन्तीति । तथानुष्ठिते गर्गः पादप्रक्षालनापमानात्सोमो लघ्वासनदानाद्दत्तः कदशनतो यातः । एवं ते त्रयोपि परित्यज्य गताः । चतुर्थः श्यामलको यावन्न याति तावदर्धचन्द्रप्रदानेन निष्कासितः । अतोहं ब्रवीमि ।

गर्गो हि पादशौचाल्लघ्वासनदानतो गतः सोमः ।
दत्तः कदशनभोज्याच्छ्यामलकश्चार्धचन्द्रेणेति ॥ ४७ ॥

तत्किमहं रथकारवन्मूर्खो यतः स्वयमपि दृष्ट्वा ते विकारं पश्चाद्विश्वसिमि । उक्तं च ।

प्रत्यक्षेपि कृते पापे मूर्खः सान्त्वं प्रशाम्यति ।
रथकारः स्वकां भार्यां सजारां शिरसावहत् ॥ ४८ ॥

मकर आह । कथमेतत् । स आह ।

कथा ७.

कस्मिंश्चिदधिष्ठाने कश्चिद्रथकारः प्रतिवसति स्म । तस्य भार्या

Digitized by Google

पुंश्चली जनापवादसंयुक्ता । सोपि तस्याः परीक्षार्थं व्यचिन्तयत् । कथं मयास्याः परीक्षणं कार्यम् । न चैतद्युज्यते कर्तुम् । यतः ।

नदीनां च कुलानां च मुनीनां च महात्मनाम् ।
परीक्षा न प्रकर्तव्या स्त्रीणां दुश्चरितस्य च ॥ ४९ ॥

वसोर्वीर्योत्पन्नामभजत मुनिर्मत्स्यतनयां
तथा जातो व्यासः शतगुणनिवासः किमपरम् ।
स्वयं वेदान्व्यस्यञ्छमितकुरुवंशप्रसविता
स एवाभूच्छ्रीमानहह विषमाः कर्मगतयः ॥ ५० ॥

कुलानामिति पाण्डवानामपि महात्मनां नोत्पत्तिरधिगन्तव्या यतःक्षेत्रजा इति । स्त्रीदुश्चरितं संधुक्ष्यमाणमनेकदोषान्प्रकटयति स्त्रीणामिति । तथा च ।

यदि स्यात्पावकः शीतः प्रोष्णो वा शशलाञ्छनः ।
स्त्रीणां तदा सतीत्वं स्याद्यदि स्याद्दुर्जनो हितः ॥ ५१ ॥

तथापि शुद्धामशुद्धां वापि जानामि लोकवचनात् । उक्तं च ।

यन्न वेदेषु शास्त्रेषु न दृष्टं न च संश्रुतम् ।
तत्सर्वं वेत्ति लोकोयं यत्स्याद्ब्रह्माण्डमध्यगम् ॥ ५२ ॥

एवं संप्रधार्य तामवोचत् । प्रिये अहं प्रातर्ग्रामान्तरं यास्यामि । तत्र दिनानि कतिचिद्गमिष्यन्ति । तत्त्वया किंचित्पाथेयं मम योग्यं कार्यम् । सापि तदाकर्ण्य हर्षितचित्तौत्सुक्येन सर्वकार्याणि संत्यज्य सिद्धमन्नं घृतशर्कराप्रायमकरोत् । अथवा साध्विदमुच्यते ।

दुर्दिवसे घनतिमिरे दुःसंचारासु नगरवीथीषु ।
पत्यौ विदेशयाते परमसुखं जघनचपलायाः ॥ ५३ ॥

अथासौ प्रत्यूष उत्थाय स्वगृहान्निर्गतः । सापि तं प्रस्थितं

Digitized by Google

विज्ञाय प्रहसितवदनाङ्गसंस्कारं कुर्वाणा कथंचित्तं दिवसमत्यवाहयत् । ततश्चापरदिने क्वचिद्विटगृहं गत्वाभ्यर्थ्योक्तवती । यद्ग्रामान्तरं गतः स दुरात्मा मे पतिः । तदद्य त्वयास्मद्गृहे प्रसुप्तजने समागन्तव्यम् । तथानुष्ठिते स रथकारोप्यरण्ये दिनमतिवाह्य प्रदोषे स्वगृहमपरद्वारेण प्रविष्टः शय्यातले निभृतो भूत्वा स्थितः । अत्रान्तरे स देवदत्तः शयनमागत्योपविष्टः । तं दृष्ट्वा रथकारो रोषाविष्टचित्तो व्यचिन्तयत् । किमेनमुत्थाय विनाशयाम्यथवा द्वावप्येतौ सुप्तौ हेलया हन्मि । परं पश्यामि तावच्चेष्टितमस्याः शृणोमि चानेन सहालापान् । अथान्तरे सा गृहद्वारं निभृतं विधाय शयनतलमारूढा तस्यास्तच्छयनमारोहन्त्या रथकारशरीरे पादो लग्नः । ततो व्यचिन्तयत् । नूनमेतेन दुरात्मना रथकारेण मत्परीक्षणार्थं माव्यम् । तत्स्त्रीचरित्रविज्ञानं करोमि । एवं तस्याश्चिन्तयन्त्याः स देवदत्तः स्पर्शोत्सुको बभूव । ततश्च तया कृताञ्जलिपुटयाभिहितम् । यन्महानुभाव त्वया न मे गात्रं स्पृष्टव्यं यतोहं पतिव्रता महासती च । नो चेच्छापं दत्त्वा त्वां भस्मसात्करिष्यामि । स आह । यद्येवं तत्किमर्थमहं त्वयात्रानीतः । सा प्राह । भोः शृण्वेकाग्रमनाः । अहमद्य प्रत्यूषे देवतादर्शनार्थं चण्डिकायतनं गता । तत्राकस्मिकी खे वाणी संजाता । पुत्रि किं करोमि । भक्तासि मे त्वम् । परं षण्मासाभ्यन्तरे विधिनियोगाद्विधवा भविष्यसि । ततो मयाभिहितम् । यद्भगवति यथा त्वमेतज्जानासि तथा प्रतीकारमपि वेत्सि । तदस्ति कश्चिदुपायो येन मे पतिः शतसंवत्सरजीवी भवति । ततस्तयाभिहितम् । वत्से सन्नपि नास्ति यतस्तवायत्तः स प्रती-

Digitized by Google

कारः। तच्छ्रुत्वा मयोक्तम्। देवि यन्मत्प्राणैर्भवति तदादेशय। करोमि। ततो देव्याभिहितम्। यदि परपुरुषेण सह एकस्मिञ्छयने समारुह्यालिङ्गनं करोषि तत्तव भर्तृसक्तोपमृत्युस्तस्य संचरति। त्वद्गतौ पुनरन्यदूषणशतद्वयं जीवति। तेन मया त्वमभ्यर्थितः। ततो यत्किंचित्कर्तुमनास्तत्कुरुष्व। न हि देवतावचनमन्यथा भविष्यतीति मे निश्चयः। सोपि रथकारो मूर्खस्तस्यास्तद्वचनमाकर्ण्य पुलकाङ्किततनुः शय्यातलान्निष्क्रम्य तामुवाच। साधु पवित्रे पतिव्रते साधु कुलनन्दिनि साधु। अहं दुर्जनवचनशङ्कितहृदयस्त्वत्परीक्षार्थं ग्रामान्तरव्याजं कृत्वात्र निभृतं खट्वातले लीनः स्थितः। तदेह्यालिङ्ग्य माम्। एवमुक्त्वा तामालिङ्ग्य स स्कन्धे कृत्वा तं देवदत्तमप्युवाच। भो महानुभाव मत्पुण्यैस्त्वमिहागतः। त्वत्प्रसादात्प्राप्तमद्य मया वर्षशतद्वयप्रमाणमायुः। ततस्त्वमपि मां समालिङ्ग्य स्कन्धं मे समारोह। इति तत्पत्न्यनिच्छन्तमपि देवदत्तं बलादालिङ्ग्य स्कन्धे समारोपितवान्। ततश्च तूर्यध्वनिच्छन्देन नृत्यन्सकलगृहकुरिषु बभ्राम। अतोहं ब्रवीमि।

प्रत्यक्षेपि कृते पापे मूर्खः साम्ना प्रशाम्यति।
रथकारः स्वकां भार्यां सजारां शिरसावहत्॥ ५४॥

तन्मूढ दृष्टविकारस्त्वम्। तत्कथं तव गृहं गच्छामि। अथवा यन्मां त्वं विश्वासयसि तत्ते दोषो नास्ति यत ईदृशी स्वभावदुष्टा युष्मज्जातिर्या शिष्टसङ्गादपि सौम्यत्वं न याति। अथवा स्वभावोयं दुष्टानाम्। उक्तं च।

सद्भिः संबोध्यमानोपि दुरात्मा पापपौरुषः।

Digitized by Google

घृष्यमाण इवाङ्गारो निर्मलत्वं न गच्छति ॥ ५५ ॥

अथवा साध्विदमुच्यते ।

सूर्यं भर्तारमुत्सृज्य पर्जन्यं मारुतं गिरिम् ।
स्वयोनिं मूषिका प्राप्ता स्वजातिर्दुरतिक्रमा ॥ ५६ ॥

मकर आह । कथमेतत् । सोब्रवीत् ।

कथा ८.

अस्ति कस्मिंश्चिदधिष्ठाने तपोवने शालङ्कायनो नाम तपोधनो जान्हव्यां स्नानार्थं गतः । तस्य च सूर्योपस्थानं कुर्वतस्तत्र प्रदेशे मूषिका काचित्खरतरनखाग्रपुटेन श्येनेन गृहीता । तां दृष्ट्वा स मुनिः करुणार्द्रहृदयो मुञ्च मुञ्चेति कुर्वाणस्तस्य पाषाणखण्डं प्राक्षिपत् । सोपि पाषाणखण्डप्रहारव्याकुलेन्द्रियो भ्रष्टमूषिको भूमौ निपपात । मूषिकापि भयत्रस्ता कर्तव्यमजानती रक्ष रक्षेति जल्पन्ती मुनिचरणान्तिकमुपाविशत् । श्येनेनापि चेतनां लब्ध्वा मुनिरुक्तः । यद्भो मुने न युक्तमनुष्ठितं भवता यदहं पाषाणेन ताडितः । किं त्वमधर्मान्न बिभेषि । तत्समर्पय ममैनां मूषिकाम् । नो चेत्प्रभूतं पातकमवाप्स्यसि । इति ब्रुवाणं श्येनं प्रोवाच सः । भो विहंगाधम रक्षणीयाः प्राणिनां प्राणाः । दण्डनीया दुष्टाः । संमाननीयाः साधवः । पूजनीया गुरवः । स्तुत्या देवाः । तत्किमसंबद्धं प्रजल्पसि । श्येन आह । मुने न त्वं सूक्ष्मधर्मं वेत्सि । इह हि सर्वेषां प्राणिनां विधिना सृष्टिं कुर्वताहारोपि विनिर्मितः । ततो यथा भवतामन्नं तथास्माकं मूषिकादयो विहिताः । तत्स्वाहारकाङ्क्षिणं मां किं दूषयसि । उक्तं च ।

Digitized by Google

यद्यस्य विहितं भोज्यं न तत्तस्य प्रदुष्यति ।
अभक्ष्ये बहुदोषः स्यात्तस्मात्कार्यो न व्यत्ययः ॥ ५७ ॥
मद्यं यथा द्विजातीनां मद्यपानो यथा हविः ।
भक्ष्यमभक्ष्यतामेति तथान्येषामपि द्विज ॥ ५८ ॥
भक्ष्यं भक्षयतां श्रेयो अभक्ष्यं तु महदघम् ।
तत्कथं मां वृथाचारं त्वं दण्डयितुमर्हसि ॥ ५९ ॥

अपरं मुनीनां न चैष धर्मो यतस्तैर्दृष्टमदृष्टं श्रुतमश्रुतमलौल्यत्वमशत्रुत्वं प्रशस्यते । उक्तं च ।

समः शत्रौ च मित्रे च समलोष्टाश्मकाञ्चनः ।
सुहृन्मित्रे ह्युदासीनो मध्यस्थो द्वेष्यबन्धुषु ॥ ६० ॥
साधुष्वपि च पापेषु समबुद्धिर्विशिष्यते ।
साधूनां निरवद्यानां सदाचारविचारिणाम् ॥ ६१ ॥
योगी युञ्जीत सततमात्मानं रहसि स्थितः ।
तत्त्वमनेन कर्मणा भ्रष्टतपाः संजातः ।

उक्तं च ।

मुञ्च मुञ्च पतत्येको मा मुञ्चेति द्वितीयकः ।
उभयोः पतनं दृष्ट्वा मौनं सर्वार्थसाधनम् ॥ ६२ ॥

शालङ्कायन आह । कथमेतत् । श्येन आह ।

कथा ९.

कस्मिंश्चिन्नदीतट एकतद्वितत्रिताभिधानास्त्रयोपि भ्रातरो मुनयस्तपः कुर्वन्ति । तेषां च तपःप्रभावादाकाशस्था धौतपोतिका निरालम्बा जलार्द्रा भूस्पर्शनभयेन स्नानसमये तिष्ठन्ति । अ-

Digitized by Google

थान्येद्युर्मयेव काचिन्मण्डूकिका केनापि गृध्रेण छलेन नीता। अथ तां गृहीतां विलोक्य तेषां ज्येष्ठेन करुणार्द्रहृदयेन भवतेव व्याहृतम्। मुञ्च मुञ्चेति। अत्रान्तरे तस्य धौतपोतिकाकाशाद्भूमौ पतिता। तां पतितां दृष्ट्वा द्वितीयेन तद्भयार्त्तेन मा मुञ्च मा मुञ्चेत्यभिहितं यावत्तावत्तस्यापि पपात। ततस्तृतीयो द्वयोरपि धौतपोतिकां भूमौ पतितां दृष्ट्वा तूष्णीं बभूव। अतोहं ब्रवीमि।

मुञ्च मुञ्च पतत्येको मा मुञ्चेति द्वितीयकः।
उभयोः पतनं दृष्ट्वा मौनं सर्वार्थसाधनम् ॥ ६३ ॥

तच्छ्रुत्वा मुनिर्विहस्याह। भो मूर्खविहंगम कृतयुगे धर्मः स आसीत्। यतः कृतयुगे पापालापतोपि पापं जायते तेन धौतपोतिके पतिते अशिष्टालापेन न सदपवचनदोषतः। एष पुनः कलियुगः। अत्र सर्वोपि पापात्मा। तत्कर्म कृतं विना पापं न लगति। उक्तं च।

संचरन्तीह पापानि युगेष्वन्येषु देहिनाम्।
कलौ तु पापसंयुक्ते यः करोति स लिप्यते ॥ ६४ ॥

उक्तं च।

आसनाच्छयनाद्यानात्संगतेश्चापि भोजनात्।
कृते संचरते पापं तैलबिन्दुरिवाम्भसि ॥ ६५ ॥

तत्किं वृथाप्रलपितेन। गच्छ त्वम्। नो चेच्छापयिष्यामि। अथ गते श्येने मूषिकया स मुनिरभिहितः। भगवन् नय मां स्वाश्रयम्। नो चेदन्यो दुष्टपक्षी कश्चिन्मां व्यापादयिष्यति। तदहं तत्रैवाश्रये त्वदुत्तान्नाहारमुष्टया कालं नेष्यामि। सोपि दाक्षिण्यवान्सकरुणो व्यचिन्तयत्। कथं मया मूषिका हस्ते धृता नेया जनहास्यकारिणी।

Digitized by Google

तदेनां कुमारिकां कृत्वा नयामि । एवं सा कन्यका कृता । तथानुष्ठिते कन्यासहितं मुनिमवलोक्य पत्नी पप्रच्छ । भगवन् कुत इयं कन्या । स आह । एषा मूषिका श्येनभयाच्छरणार्थिनी कन्यारूपेण तव गृहमानीता । तत्त्वया यत्नेन रक्षणीया । भूयोप्येनां मूषिकां करिष्यामि । सा प्राह । भगवन् मैवं कार्षीः । अस्यास्त्वं धर्मपिता । उक्तं च ।

जनिता चोपनेता च यस्तु विद्यां प्रयच्छति ।
अन्नदाता भयत्राता पञ्चैते पितरः स्मृताः ॥ ६६ ॥

तत्त्वयास्याः प्राणाः प्रदत्ताः । अपरं ममाप्यपत्यं नास्ति । तस्मादेषा मम सुता भविष्यति । तथानुष्ठिते सा कन्यका शुक्लपक्षचन्द्रकलिकेव नित्यमेव वृद्धिं प्राप्नोति । सापि तस्य मुनेः शुश्रूषां कुर्वती सपत्नीकस्य यौवनमाश्वयात् । अथ तां यौवनोन्मुखीमवलोक्य शालङ्कायनः स्वपत्नीमुवाच । प्रिये यौवनोन्मुखी वर्तत इयं कन्या । अनर्हा सांप्रतं मद्गृहवासस्य । उक्तं च ।

अनूढा मन्दिरे यस्य रजः प्राप्नोति कन्यका ।
पतन्ति पितरस्तस्य स्वर्गस्था अपि तैर्गुणैः ॥ ६७ ॥

तत्कस्मैचिच्छ्रेष्ठवराय प्रदीयते । उक्तं च ।

वरं वरयते कन्या माता वित्तं पिता श्रुतम् ।
बान्धवाः कुलमिच्छन्ति मिष्टान्नमितरे जनाः ॥ ६८ ॥

तथा च ।

यावन्न लज्जते कन्या यावत्क्रीडति पांशुना ।
यावत्तिष्ठति गोमार्गे तावत्कन्यां विवाहयेत् ॥ ६९ ॥
माता चैव पिता चैव ज्येष्ठभ्राता तथैव च ।

Digitized by Google

त्रयस्ते नरकं यान्ति दृष्ट्वा कन्यां रजस्वलाम् ॥ ७० ॥

तथा च ।

कुलं च शीलं च सनाथतां च विद्यां च वित्तं च वपुर्वयश्च ।
एतान्गुणान्सप्त परीक्ष्य देया कन्या बुधैः शेषमचिन्तनीयम् ॥ ७१ ॥

अन्यच्च ।

दूरस्थानामविद्यानां मोक्षधर्मानुवर्तिनाम् ।
शूराणां निर्धनानां च न देया कन्यका बुधैः ॥ ७२ ॥

तद्यद्यस्य रोचते तद्गणयित्वा तस्मै प्रयच्छामि । कन्या च ।

अनिष्टः कन्यकायाश्च यो वरो रूपान्वितोपि यः ।
यदि स्यात्तस्य न देया कन्या श्रेयोभिवाञ्छता ॥ ७३ ॥

साह । कस्मै दोषेण विवाहे । एवं क्रियताम् । अथ मुनिना समाकृष्टः सविता तत्सकाशमुपेत्य प्रोवाच । भगवन् वद तुष्टं किमर्थमाहूतोऽहं । स आह । एषा मत्कन्या यदि त्वां वृणोति तद्विवाहय । एवमुक्त्वा स भगवांस्तस्या दर्शितः । प्रोवाच च । पुत्रि किं तव रोचत एष भगवांस्त्रैलोक्यदीपः । सा प्राह । तात अतिदहनात्मकोयम् । नाहमेनमभिलषामि । अस्मादपि यः कश्चित्तुल्यकुलशीलः स आहूयताम् । अथ तस्यास्तद्वचनमाकर्ण्य भास्वरोपि तां मूषिकां विदित्वा निःस्पृहस्तमुवाच । भगवन् अस्ति मामाप्युत्तमो मेघो येनाच्छादितस्य मे नामापि न ज्ञायते । अथ मुनिना मेघोप्याहूतः । एष रोचते । सा मुनिमाह । यद्यां मेघादपि श्रेष्ठाय प्रयच्छ । अथ मेघोपि मुनिना पृष्टः । भोस्तवान्यधिकः कोप्यस्ति । स आह । यद्यस्ति ममाप्यधिको वायुः । वायुना हतोहं सहस्रधा याामि । तच्छ्रुत्वा मुनिना

Digitized by Google

वायुराहूतः । आह च । एष उत्तमो जातुस्तव प्रतिभाति । सा प्राह । तात प्रलोभ्यं चञ्चलः । तदभ्यधिकः श्रेष्ठतर आनीयताम् । मुनिराह । भद्रे वायो तवाभ्यधिकोस्ति कश्चित् । स आह । ममाप्यधिकाः पर्वताः सन्ति यैः संलभ्य बलवन्तोपि वयं श्रिया-
5 महे । अथ मुनिः पर्वतमाहूय कन्याया अदर्शयत् । पुत्रिके तवास्मै प्रयच्छामि । साह । तात कठिनात्मकोयम् । तदन्यस्य प्रदीयताम् ॥ अथ स मुनिना पृष्टः । वत्सः पर्वतराज तवाभ्यधिकः कश्चिदस्ति । स आह । सन्ति ममाप्यधिका मूषकाः । यैरस्महेहं बलात्सर्वतो भेद्यन्ति । तदाकर्ण्य मुनिर्मूषकमाहूय तस्या अद-
10 र्शयत् । पुत्रिके एष ते प्रतिभाति मूषकराजो येन यथोचितमनुष्ठीयते । सापि तं दृष्ट्वा स्वजातीयमिति मन्यमाना प्रोद्भूषितशरीरान्ता प्रोवाच । तात मां मूषिकां कृत्वास्मै मूषकाय प्रयच्छ येन स्वजातिविहितं गृहस्थधर्ममनुभवामि । तच्छ्रुत्वा तेन स्त्रीधर्मविचक्षणेन तां मूषिकां कृत्वा मूषकाय प्रदत्ता । अथया साध्विद-
15 मुच्यते ।

न सुवर्णं न रत्नानि न च राज्यपरिक्रियाम् ।
तथा वाञ्छन्ति कामिन्यो यथाभीप्सितमं वरम् ॥ ७४ ॥

तद्यथा सा मूषिका देवपदं त्यक्त्वा स्वजातिदोषेण नीचसंगमं गता । तथा त्वमपि मया संगतोपि लोहगृहीतोपि स्वजातिधर्मदुष्टः
20 संजातः ॥ अतोहं ब्रवीमि ।

सूर्यं भर्तारमुत्सृज्य वर्जन्यं मारुतं गिरिम् ।
स्वजातिं मूषिका प्राप्ता स्वजातिर्दुरतिक्रमा ॥ ७५ ॥

तन्मूर्ख स्त्रीमुख्या स्त्रीसिंह अन्येपि ये स्त्रीधर्मा भवन्ति । ते

Digitized by Google

स्वकार्यं विभवं मित्रं च परित्यजन्ति तत्कृते । उक्तं च ।

या ममोद्विजते नित्यं साद्य मामवगूहते ।
प्रियकारक भद्रं ते यन्ममास्ति हरस्व तत् ॥ ७६ ॥

मकर आह । कथमेतत् ।

कथा १०.

अस्ति कस्मिंश्चिदधिष्ठाने कामार्त्तो नाम महाधनी वणिक्पुत्रो वृद्धः । तेन मृतभार्येण कामोपहतचेतसा काचिन्निर्धनस्य दुहिता प्रभूतवित्तं दत्त्वोद्वाहिता । अथ सा दुःखाभिभूता तं वृद्धतमं वणिजं वीक्षितुमपि न शक्नोति । अथवा साध्विदमुच्यते ।

श्वेतं पदं शिरसि वीक्ष्य शिरोरुहाणां
स्थानं परं परिभवस्य तदेव पुंसाम् ।
आरोपितास्थिशकलं परिहृत्य यान्ति
चाण्डालकूपमिव दूरतरं तरुण्यः ॥ ७७ ॥

तथा च ।

गात्रं संकुचितं गतिर्विगलिता दन्ताश्च नाशं गता-
श्चक्षुर्भ्राम्यति रूपमेव हसते वक्त्रं च लालायते ।
वाक्यं नैव करोति बान्धवजनः पत्नी न शुश्रूषते
हा कष्टं जरयाभिभूतपुरुषं पुत्रैरवज्ञायते ॥ ७८ ॥

अथ कदाचित्सा तेन सहैकशयने पराङ्मुखी स्थिता यावत्तिष्ठति तावत्तस्य गृहे चौरः प्रविष्टः । सापि तं चौरमवलोक्य भयव्याकुलमनास्तं वृद्धमप्यालिङ्गितवती । सोपि विस्मयात्पुलकाङ्कितसर्वगात्रश्चिन्तयामास । किमेषा मामद्यावगूहते । अहो

Digitized by Google

चित्रमेतत्। ततश्च यावन्निपुणतयावलोकयति तावच्चौरः प्रविष्टः कोणैकदेशे तिष्ठति। पुनरचिन्तयत्। नूनमेषा चौरस्य शङ्कया मां समालिङ्गति। तज्ज्ञात्वा चौरमाह।

या ममोद्विजते नित्यं साद्य मामवगूहते।
प्रियकारक भद्रं ते यन्ममास्ति हरस्व तत्॥ ७९॥

भूयोपि निर्गच्छन्तमवादीत्। भो चौर नित्यमेव त्वया रात्रावागन्तव्यम्। मदीयोयं विभवस्त्वदीय इति। अतोहं ब्रवीमि।

या ममोद्विजते नित्यं साद्य मामवगूहते।
प्रियकारक भद्रं ते यन्ममास्ति हरस्व तत्॥ ८०॥

किं बहुना। तेन च स्त्रीलुब्धेन स्वं सर्वमपि चौरस्य समर्पितम्। त्वयापि तथानुष्ठितम्। अथैवं तेन सह तस्य विवदतो जलचरेण केनाप्यागत्याभिहितम्। भो मकर त्वदीयभार्यानशनोपविष्टा त्वयि चिरयति प्रणयाभिभवाद्विपन्ना। सोपि तच्छ्रुत्वातीव व्याकुलमना व्यचिन्तयत्। अहो किमिदं संजातं मम मन्दभाग्यस्य। उक्तं च।

न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते।
गृहं तु गृहिणीहीनं कान्तारादतिरिच्यते॥ ८१॥
वृक्षमूलेपि दयिता यत्र तिष्ठति तद्गृहम्।
प्रासादोपि तया हीनो अरण्यसदृशः स्मृतः॥ ८२॥

तथा च।

माता यस्य गृहे नास्ति भार्या च प्रियवादिनी।
अरण्यं तेन गन्तव्यं यथारण्यं तथा गृहम्॥ ८३॥

तन्मित्र क्षम्यतां मया तेपराधः कृतः। संप्रत्यहं तद्वियोगाद्व-

Digitized by Google

न्हिप्रवेशं करिष्यामि । तदाकर्ण्य वानरः प्रहस्य प्रोवाच । भो ज्ञातस्त्वं मया प्रथममेव यत्त्वं स्त्रीजितः स्त्रीवशश्च । सांप्रतं पुनः प्रत्ययः संजातः । तन्मूढ आनन्दे कार्ये त्वं कस्माद्विषादं गतः । तादृग्दुष्टभार्यायां मृतायामुत्सवः कर्तुं युज्यते । उक्तं च ।

या भार्या दुष्टचरिता सततं कलहप्रिया ।
भार्यारूपेण सा ज्ञेया विदग्धैर्दारुणा जरा ॥ ८४ ॥
तस्मात्सर्वप्रयत्नेन नामापि परिवर्जयेत् ।
स्त्रीणामिह हि सर्वासां य इच्छेत्सुखमात्मनः ॥ ८५ ॥
के नाम न विनश्यन्ति मिथ्याज्ञानान्वितस्त्रियम् ।
रम्यां बुद्बुदोपसर्पन्ति ये ज्वालां शलभा इव ॥ ८६ ॥
अन्तर्विषमया ह्येता बहिर्वृत्त्या मनोरमाः ।
गुञ्जाफलसमाकाराः स्वभावादेव योषितः ॥ ८७ ॥
यदन्तस्तन्न जिह्वायां यज्जिह्वायां न तद्गृहे ।
यद्गृहेस्तन्न कुर्वन्ति विचित्रचरिताः स्त्रियः ॥ ८८ ॥
ताडिता अपि दण्डेन शस्त्रैरपि विखण्डिताः ।
न वशं योषितो यान्ति न दानैर्न च संस्तवैः ॥ ८९ ॥
आस्तां तावत्किमन्येन दौरात्म्येनात्र योषिताम् ।
विधृतं स्वोदरेणापि घ्नन्ति पुत्रमपि स्वकम् ॥ ९० ॥
रूक्षायां स्नेहसंभारं कठोरायां सुमार्दवम् ।
नीरसायां रसं बालो बालिकायां विकल्पयेत् ॥ ९१ ॥

मकर आह । भो अस्त्येतत् । परं किं करोमि । अनर्थद्वयमेतत्संजातम् । एकस्तावद्बृहद्भूपरस्तु त्वद्विधेन मित्रेण सह चिरविश्लेषः । अथवा भवत्येवं दैवोपहतानाम् । उक्तं च ।

Digitized by Google

यादृशं मम पाण्डित्यं तादृशं हि गुणं तव ।
न जारो न च भर्ता च किं निरीक्षसि नक्षिके ॥ ९२ ॥

वानर आह । कथमेतत् । सोऽब्रवीत् ।

कथा ११.

कस्मिंश्चिदधिष्ठाने हालिकदंपती प्रतिवसतः स्म । सा च हालिकपत्नी पतिवृद्धभावात्सदैवान्यचित्ता न किंचिदपि गृहे स्थैर्यमालम्बते । केवलं परपुरुषान्वेषणा भ्रमति । अन्यदा केनचित्परवित्तापहारकेन धूर्तेन सा लक्षिता विजने प्रोक्ता च । सुभगे मृतभार्योहं तव रूपलावण्यदर्शनेन हृदये स्मरबाणेन पीडितः । तद्दीयतां मे रतिदक्षिणा । ततस्तयाभिहितम् । भोः सुभग यद्येवं तदस्ति मे पत्युः प्रभूतं धनम् । स वृद्धभावात्प्रचलितुमसमर्थः । अतस्तद्धनमादायाहमागच्छामि । पश्चात्त्वया सहान्यत्र गत्वा यथेच्छं रतिसौख्यमनुभवामि । स आह । रोचते ममाप्येतत् । प्रत्यूषेत्र स्थाने समागन्तव्यं येन शुभतरं किंचिन्नगरं गत्वा त्वया सह जीवलोकसुखमनुभवामि । सापि तथेति प्रतिज्ञाय प्रहसितवदना स्वं गृहं गत्वा प्रसुप्तस्य पत्युः सर्वं धनं रात्रावादाय प्रत्यूषे तत्कथितस्थानमुपाद्रवत् । धूर्तोपि तामग्रे कृत्वा दक्षिणां दिशमाश्रित्य सत्वरगतिः प्रस्थितः । अथ तयोर्व्रजतोर्योजनद्वयमात्रेणाग्रतो नदीं समुपस्थितां दृष्ट्वा धूर्तश्चिन्तयामास । किमहमनया यौवनप्रान्ते वर्तमानया करिष्यामि । कदाचित्पृष्ठतः कश्चित्समागमिष्यति । तत्केवलं वित्तमादाय गच्छामि । इति निश्चित्य तामुवाच । प्रिये सुदुस्तरेयं नदी । तत्तावदहं द्रव्यमात्रं पारे धृत्वा समागच्छामि

Digitized by Google

येन त्वामेकाकिनीं सुखेन पृष्ठमारोप्य नयामि । सा प्राह । भद्र एवं क्रियताम् । एवमुक्त्वा तस्मा अशेषं वित्तमर्पयामास । अथ तेनाभिहितम् । प्रिये परिधानवस्त्रमपि समर्पय येन जलमध्ये निःशङ्का व्रजसीति । तथानुष्ठिते केवलं वित्तमादाय वाञ्छितविषयं धूर्तो गतः । सापि कण्ठनिवेशितहस्तयुगला सोद्वेगा नदीतीरे यावदुपविष्टा तिष्ठति तावत्तत्रान्तरे काचिच्छृगालिका वदनगृहीतमांसपिण्डा तत्रागमत् । अथ यावत्पश्यति तावन्नदीतीरे महामत्स्यः सलिलान्निष्क्रम्य बहिः स्थितः । तं दृष्ट्वा सा मांसपिण्डमुत्सृज्य तं मत्स्यं प्रत्युपाद्रवत् । अत्रान्तरे गृध्रस्तं दृष्ट्वा मांसपिण्डमादाय च खमुत्पपात । मत्स्योपि शृगालिकां दृष्ट्वा नद्यां प्रविष्टः । अथ सा व्यर्थश्रमा तं गृध्रं विलोकयन्ती तया देवदत्तया सस्मितमभिहिता ।

गृध्रेणापि हृतं मांसं मत्स्योपि सलिलं गतः ।
मत्स्यमांसपरिभ्रष्टे किं निरीक्षसि जम्बुके ॥ ९३ ॥

तच्छ्रुत्वा कोपयुक्तया शृगाल्याभिहितम् ।

यादृशं मम पाण्डित्यं तादृशं द्विगुणं तव ।
न जारो न च भर्ता च किं निरीक्षसि नग्निके ॥ ९४ ॥

एवं तस्य कथयतः पुनरन्येन जलचरेणागत्य निवेदितम् । भो यदहो त्वदीयं गृहमप्यपरेण महामकरेण संगृहीतम् । तच्छ्रुत्वासौ दुःखितमनास्तं गृहान्निःसारयितुमुपायं चिन्तयन्नाह । अहो पश्यत मे दैवम् ।

मित्रं चामित्रतां यातमपरं मे प्रिया मृता ।
गृहमन्येन च व्याप्तं किमद्यापि भविष्यति ॥ ९५ ॥

अथवा युक्तमिदमुच्यते । छिद्रेष्वनर्था बहुलीभवन्तीति ।

Digitized by Google

तत्किं करोम्यमेन सह युद्धं किंवा साम्नैव संबोध्य गृहान्निःसारयामि किंवा भेददानं करोमि। अथवामुमेव वानरं मित्रं पृच्छामि। उक्तं च।

यः पृष्ट्वा कुरुते कार्यं प्रष्टव्यान्स्वान्हितान्गुरून्।
न तस्य जायते विघ्नः कस्मिंश्चिदपि कर्मणि॥ ९६॥

इति विचिन्त्य भूयोपि जम्बूपादपमारूढं कपिमपृच्छत्। भो मित्र पश्य मे मन्दभाग्यतां यत्संप्रति गृहमपि मे बलवन्मकरेण रुद्धम्। तदहं पृच्छामि। कथय किं करोमि। सामादीनामुपायानां मध्ये कस्यात्र विषयः। स आह। भोः कृतघ्न मया निषिद्धोपि किं भूयो मामनुसरसि। नाहं तव मूर्खस्योपदेशमपि ददामि। उक्तं च यतः।

उपदेशो न दातव्यो यादृशे तादृशे नरे।
पश्य वानरमूर्खेण सुगृही निर्गृही कृता॥ ९७॥

वानर आह। कथमेतत्। सोब्रवीत्।

कथा १२.

कस्मिंश्चिदरण्ये वृक्षशाखाकृतकुलायौ पक्षिदंपती प्रतिवसतः स्म। अथ कदाचिन्मासे कालवृष्टिसमाहतासौम्यवातकम्पिततनुः कश्चिद्वानरस्तदेव वृक्षमूलमुपागतः। सोपि दन्तवीणां वादयन्संकुचितकरचरणश्चटकयाभिहितः।

हस्तपादसमायुक्तो दृश्यसे पुरुषाकृतिः।
शीतवातहतो मूढ कथं न कुरुषे गृहम्॥ ९८॥

Digitized by Google

सोपि तदाकर्ण्य व्यचिन्तयत् । अहो आत्मसंतुष्टो जीवलोको यदेषा क्षुद्रचटकात्मानं बहु मन्यते ।

स्वचित्तकल्पितो गर्वः कस्य नाम न विद्यते ।
उत्क्षिप्य टिट्टिभी पादौ शेते भङ्गभयाद्दिवः ॥ ९९ ॥

एवं विचिन्त्य तामाह ।

सूचीमुखि दुराचारे रण्डे पण्डितमानिनि ।
तूष्णीं भव करिष्यामि नो चेत्त्वां निर्गृहीमहम् ॥ १०० ॥

एवं तेन निषिद्धापि पुनराश्चर्यकरणोपदेशेन तमुद्वेजयति । तदासौ तं वृक्षमारुह्य तस्याः कुलायं खण्डशः कृत्वा समज्ज । अतोहं ब्रवीमि ।

उपदेशो न दातव्यो यादृशे तादृशे जने ।
पश्य वानरमूर्खेण सुगृही निर्गृही कृता ॥ १०१ ॥

तच्छ्रुत्वा मकर आह । भो मित्र सापराधस्यापि मे कथय पूर्वस्नेहात् । वानर आह । नाहं करिष्यामि यतस्त्वयाहं भार्यावाक्येन समुद्रे प्रक्षेपणाय नीतः । तदेतन्न युक्तम् । यद्यपि भार्या सर्वलोकादपि वल्लभा भवति तथापि न मित्रबान्धवादयो भार्यावाक्येन समुद्रे प्रक्षिप्यन्ते । तन्मूर्खो मूढचेतनो यतस्त्वया स्त्रियोर्यमेतत्कार्यमनुष्ठातुमारब्धम् । न हि स्त्रीणां कथंचिद्विश्वासमुपगच्छेत् ।

यदर्थं स्वकुलं त्यक्तं जीवितार्धं च हारितम् ।
सा मां त्यजति निःस्नेहा कः स्त्रीणां विश्वसेन्नरः ॥ १०२ ॥

मकर आह । कथमेतत् । सोब्रवीत् ।

Digitized by Google

कथा १३.

अस्ति कस्मिंश्चिदधिष्ठाने कोपि ब्राह्मणः । तस्य च प्रियातिप्राणप्रिया । सापि कुटुम्बेन समं प्रतिदिनं कलहं कुर्वाणा न क्षणमपि विश्राम्यति । सोपि ब्राह्मणः कलहमसहमानो भार्यावाक्यात्स्वकुटुम्बं परित्यज्य ब्राह्मण्या सह विप्रकृष्टदेशान्तरं गतः । अथ महाटवीमध्ये ब्राह्मण्याभिहितम् । यदार्यपुत्र तृषा मां बाधते । तदुदकं कुतोप्यानय । अथासौ तद्वचनानन्तरं यावदुदकं नीत्वागच्छति तावत्तां मृतामपश्यत् । अतिवल्लभतया विषादं कुर्वन्यावद्विलपति तावदाकाशे वाचं शृणोति । यदि भो ब्राह्मण त्वं स्वजीवितस्यार्धं ददासि तत्ते जीवति ब्राह्मणी । तद्ब्राह्मणेन शुचीभूय तिसृभिर्वाचाभिः स्वजीवितार्धं दत्तम् । वाक्यसमयेव जीविता सा ब्राह्मणी । अथ तौ जलं पीत्वा वनफलानि भक्षयित्वा गन्तुमारब्धौ । ततः क्रमेण कस्यचिन्नगरस्य प्रवेशे पुष्पवाटिकां प्रविश्य ब्राह्मणो भार्यामभिहितवान् । भद्रे यावदहं भोजनं गृहीत्वा समागच्छामि तावत्त्वयात्र स्थातव्यम् । इत्यभिधाय ग्रामं गतः । अथ तस्यां पुष्पवाटिकायां पङ्कुररघट्टं खेलयमानो दिव्यगिरा गीतमुद्गिरति । तच्च श्रुत्वा कुसुमेषुणाभिहतया तया तत्सकाशं गत्वाभिहितम् । भद्र यदि मां न कामयसे तन्मदीया स्त्रीहत्या तव । पङ्कुराह । किं व्याधिग्रस्तेन मया करिष्यसि । साह । इतः प्रभृति यावज्जीवं मयात्मा भवतो दत्तः । इति ज्ञात्वा भवानप्यावाभ्यां सहागच्छतु । सोब्रवीत् । एवमस्तु । अथ ब्राह्मणो भोजनं गृहीत्वा समागत्य तया सह भोक्तु-

Digitized by Google

मारण्यः। साब्रवीत्। एष पङ्गुर्बुभुक्षितः। तदेतस्यापि कियन्तमपि ग्रासं देहीति। तथानुष्ठिते ब्राह्मण्याभिहितम्। भो विप्र सहायहीनस्त्वम्। यदा ग्रामान्तरं गच्छसि तदा मम वचनसहायोपि नास्ति। तत एनं पङ्गुं गृहीत्वा गच्छावः। सोब्रवीत्। त्वं न शक्नोष्यात्मानमात्मना वोढुं किं पुनरिमं पङ्गुम्। सा प्राह। यत्पेटाभ्यन्तरस्थमहं नेष्यामि। अथ तत्कृतकवचनव्यामोहितचित्तेन तेनापि प्रतिपन्नम्। तथानुष्ठिते चान्यस्मिन्दिने कूपोपकण्ठविश्रान्तो ब्राह्मणस्तया पङ्गुपुरुषासक्तया संप्रेर्य कूपान्तः पातितः। सापि पङ्गुं गृहीत्वा कस्मिंश्चिन्नगरे प्रविष्टा। तत्र च चौर्यरक्षानिमित्तं राजपुरुषैरितस्ततो भ्रमद्भिस्तन्मस्तकस्था पेटा दृष्ट्वा बलादाच्छिद्य राज्ञोग्रे नीता। यावत्तामुद्घाटयति राजा तावत्पङ्गुं ददर्श। ततः सा ब्राह्मणी विलापान्कुर्वती राजपुरुषपदैरेव तत्रागता राज्ञा पृष्टा। को वृत्तान्त इति। साब्रवीत्। ममैष भर्ता व्याधिग्रस्तो दायादसमूहैरुद्वेजितो मया स्नेहव्याकुलचित्तया शिरसि कृत्वा त्वत्सकाशमानीतः। एतच्छ्रुत्वा राजाब्रवीत्। यन्मम त्वं भगिनी। ग्रामद्वयं गृहीत्वा भर्त्रा सह भोगान्भुञ्जाना सुखेन तिष्ठ। अथ स ब्राह्मणो दैववशात्केनापि साधुना कूपादुत्तारितः परिभ्रमंस्तदेव नगरमायातः। तया दुष्टभार्यया दृष्टो राज्ञे निवेदितः। राजन् अयं मद्भर्तुर्वैरी समायातः। राज्ञापि वधार्थं समादिष्टः। सोब्रवीत्। देव अनया मम सक्तं किंचिद्गृहीतमस्ति। ततो यदि त्वं धर्मवत्सलस्ततो दापय। राजाब्रवीत्। भद्रे त्वयास्य सक्तं किंचिद्गृहीतमस्ति तत्समर्पय। सा प्राह। देव मया न किंचिद्गृहीतम्। ब्राह्मण आह। यन्मया त्रिवाचिकं

Digitized by Google

स्वजीवितार्थं तव दत्तम् । तद्देहि मे । अथ सा राजभयात्तस्यैव निवाचिकमेव जीवितं मया दत्तमिति जल्पन्ती प्राणैर्विमुक्ता । ततः सविस्मयं राजाब्रवीत् । किमेतदिति । ब्राह्मणेनापि सकलोपि वृत्तान्तस्तस्मै निवेदितः । अतोहं ब्रवीमि ।

यदर्थं स्वकुलं त्यक्तं जीवितार्थं च हारितम् ।
सा मां त्यजति निःस्नेहा कः स्त्रीणां विश्वसेन्नरः ॥ १०३ ॥

अथ तच्छ्रुत्वा मकर आह । भो वयस्य मे कृतद्रोहबुद्धेः परमकृपया ममोपरि प्रसादं कृत्वा शोभनोपायः कथ्यतां येनोपायेन सुखेन गृहं प्राप्नोमि । तच्छ्रुत्वा कपिराह । भो दुर्बुद्धे भवान्कथितमपि न संविधास्यति । यथा ।

सतां वचनमादिष्टं यो मोहादवमन्यते ।
स एव नाशमाप्नोति सिंहहासेरको यथा ॥ १०४ ॥

मकर आह कथमेतत् । सोब्रवीत् ।

कथा १४.

अस्ति कस्मिंश्चिदधिष्ठाने मन्दमतिनामा रथकारः प्रतिवसति स्म । तेन स्वकर्मानभिज्ञेनोष्ट्री गृहीता । तस्याः खादनपानादिकं कुर्वन्कालं नयति । ततो महतोष्ट्रेण संगमो जातः । सा गर्भं दधार । अथ प्रसवसमये प्रसूता । दासेरको जातः । अथ नगरनिकटवाटिकायां धवखदिरपलाशाम्रजम्बून्यग्रोधादीनां पल्लवभक्षणादहर्निशं पीवरतनुरुष्ट्री संजाता । सोपि दासेरको महानुष्ट्रः संजातः । ततः स नित्यमेव दुग्धं नीत्वा कुटुम्बं परिपालयति । रथकारेण पल्लभत्वाद्दासेरकग्रीवायां घण्टा बद्धा । पश्चा-

Digitized by Google

द्रथकारो व्यचिन्तयत् । किमन्यैर्दुष्कृतकर्मभिः । एतदेवोष्ट्रीपरिपालनमस्य कुटुम्बस्य भरणपोषणे भव्यं जातम् । तत्किमन्येन व्यापारेण । तत एतस्या उपरि द्रम्मा गृह्यन्ते । एवं विचिन्त्य गृहमागत्य प्रियामाह । मयास्या उष्ट्र्या उपरि बहवो द्रम्मा ग्रहीतव्याः । ततस्त्वयैषा यत्नेन रक्षणीया यावदहमपरामुष्ट्रीं गृहीत्वागच्छामि । ततश्च द्रम्मानादाय गुर्जरग्रामे गत्वा करभाः संक्रीताः । अथ तेन महद्यूथं कृत्वा रक्षापुरुषाणां प्रतिवर्षं करभमेकं च निवेद्याहर्निशं दुग्धपानमादिष्टम् । एवं स रथकारो नित्यमेवोष्ट्रव्यापारं कुर्वन्सुखेन तिष्ठति । अथ ते दासेरका अधिष्ठानोपवन आहारार्थं गच्छन्ति । कोमलवल्लीर्भक्षयित्वा महासरसि पानीयं पीत्वा च सायं सर्वे मन्दंमन्दं लीलया गृह आगच्छन्ति । स च मदातिरेकात्पूर्वदासेरकः पृष्ठ आगत्य मिलति । ततस्तैरभिहितम् । अहो मन्दमतिरयं दासेरको यूथाद्भ्रष्टः पृष्ठे स्थित्वा घण्टां वादयन्नागच्छति । यदि कस्यापि दुष्टस्य सत्त्वस्य संदर्शे पतिष्यति तन्नूनं मरिष्यति । अथ तेषां तद्वनं गाहमानानां कश्चित्सिंहो घण्टारवमाकर्ण्य समायातः । यावदवलोकयति तावदुष्ट्रीदासेरकानां यूथं गच्छति । एकस्तु पृष्ठे क्रीडां कुर्वन्वल्लीं चरन्यावद्गच्छति तावदन्यदासेरकाः पानीयं पीत्वा स्वगृहे गताः । सोपि चिरान्निष्क्रम्य यावद्दिशोवलोकयति तावन्न कथंचिन्मार्गं वेत्ति । यूथाद्भ्रष्टो महाशब्दं कुर्वन्मन्दंमन्दं यावत्किंचिद्दूरं गच्छति तावच्छब्दानुसारेण सज्जितक्रमो भूत्वा सिंहोग्रे स्थितः । यावदुष्ट्रः समीपमागतस्तावत्सिंहेनोल्लङ्घयित्वा ग्रीवायां गृहीत्वा मारितः । अतोहं ब्रवीमि ।

Digitized by Google

सतां वचनमादिष्टं यो मोहादवमन्यते ।
स एव नाशमाप्नोति सिंहाद्दासेरको यथा ॥ १०६ ॥

अथ तच्छ्रुत्वा मकर आह । भद्र ।

प्राहुः साप्तपदं मैत्रं जनाः शास्त्रविचक्षणाः ।
मित्रतां च पुरस्कृत्य किंचिद्वक्ष्यामि तच्छृणु ॥ १०६ ॥
उपदेशोपदातॄणां नराणां हितमिच्छताम् ।
इह लोके परत्र च व्यसनं नोपपद्यते ॥ १०७ ॥
ततः कृतघ्नस्य मे कुरु प्रसादमुपदेशप्रदानेन ।
उपकारिषु यः साधुः साधुत्वे तस्य को गुणः ।
अपकारिषु यः साधुः स साधुः सद्भिरुच्यते ॥ १०८ ॥

तदाकर्ण्य वानर आह । भद्र यद्येवं तदत्वा तेन सह युद्धं कुरु । उक्तं च ।

उत्तमं प्रणिपातेन शूरं भेदेन योजयेत् ।
नीचमल्पप्रदानेन समं तुल्यपराक्रमैः ॥ १०९ ॥

मकर आह । कथमेतत् । सोब्रवीत् ।

कथा १८.

अस्ति कस्मिंश्चिद्वने महाचतुरको नाम शृगालः प्रतिवसति स्म । तेन कदाचिदरण्ये स्वयमृतो गजः समासादितः । तस्य समन्ताद्भ्रमति । परं कठिनत्वचं भेत्तुं न शक्नोति । तत्रान्तरे भ्रमंस्तत्र देशे कश्चित्सिंहः समायातः । तं दृष्ट्वा स क्षितितलविन्यस्तमौलिः प्रणम्य प्रोवाच । स्वामिन् त्वदीयो लाकुटिकः सन्नहं गजं रक्षयामि । तद्भक्षयतु स्वामी । तं दृष्ट्वा सिंह आह । भो

Digitized by Google

नाहमन्यहतं सत्त्वं कदाचिद्भक्षयामि । तन्मया प्रसादीकृत एष ते गजः । तच्छ्रुत्वा सानन्दमाह । युक्तमेतत्स्वामिनः । उक्तं च ।

अन्त्यावस्थागतोपि महान्स्वगुणान्जहाति न शुद्धतया ।
न श्वेतभावमुज्झति शङ्खः शिखिभुक्तमुक्तोपि ॥ ११० ॥

तदाकर्ण्य सिंहो गतः । अथ तस्मिन्गते कश्चिद्व्याघ्रः समायातः । तमपि दृष्ट्वा व्यचिन्तयत् । कथमेको दुरात्मा सिंहस्तावत्प्रणिपातेनापवाहितः । तदस्य कथमतिवाहनं भविष्यति । शूरोयं भेदं विना साध्यो न भविष्यति । उक्तं च ।

न यस्य शक्यते कर्तुं साम दानमथापि वा ।
भेदस्तत्र प्रयोक्तव्यो यतः स वशकारकः ॥ १११ ॥

यतः सर्वगुणसंपन्नोपि भेदेन बध्यते । उक्तं च ।

अत्यच्छेनाविरुद्धेन सुवृत्तेनातिचारुणा ।
अन्तर्भिन्नेन संप्राप्तं मौक्तिकेन निबन्धनम् ॥ ११२ ॥

एवं संप्रधार्य तस्याभिमुखो भूत्वेषदुन्नतकंधरः प्रोवाच । भाम अद्य भवानत्र मृत्युमुखे प्रविष्टः । एष गजो व्यापादितः सांप्रतं सिंहेन । स च मां रक्षपाल निधाय स्नानार्थं गतः । तन्न च मम निवेदितं गच्छता । यदि व्याघ्रः समागच्छति तन्मम सुगुप्तं निवेदनीयं येन मया निर्व्याघ्रं वनं कार्यं यतो व्याघ्रेणैकेन मया हतो गजः शून्ये भक्षयित्वोच्छिष्टता नीतः । तच्छ्रुत्वा भयत्रस्तमनाः स आह । भो भगिनीसुत देहि मे प्राणदक्षिणां त्वया यतश्चिरायागतस्य तस्य मदीया किंवदन्ती नाख्येया । एवमुक्त्वा सत्वरं प्रनष्टः । अथ तस्मिन्गते कश्चिद्वानरः समायातः । तमपि दृष्ट्वा व्यचिन्तयत् । दृढदंष्ट्रोयम् । तदस्य पार्श्वाद्गजचर्मच्छेदं कार-

Digitized by Google

यामि । एवं निश्चित्य तमुवाच । भो भगिनीसुत चिराद्दृष्टोसि । अपरं बुभुक्षितः समागतस्त्वमतिथिश्च । एष गजः सिंहेन हतस्तिष्ठति । अहं तु रक्षपालः । अतो वदामि । मांसं भक्षयित्वा तृप्तिं कृत्वा व्रज तद्यावत्समागच्छति । स आह । माम यद्येवं तन्न कार्यं मे मांसाशनेन यतो जीवन्नरो भद्रशतानि पश्यति । उक्तं च ।

यच्छक्यं ग्रसितुं ग्रस्यं ग्रस्तं परिणमेच्च यत् ।
हितं च परिणामे यत्तदाद्यं भूतिमिच्छता ॥ ११३ ॥

तदहं यास्यामि । शृगाल आह । भो विश्रब्धो भक्षय त्वम् । तस्यागमनं दूरतोहं ते निवेदयिष्यामि । तथानुष्ठिते चर्मभेदं जातं विज्ञाय तेनाभिहितम् । भो भगिनीसुत गम्यतां गम्यताम् । एष सिंहः समायाति । तच्छ्रुत्वा सोपि प्रनष्टः । अथ यावदसौ वानरकृतद्वारेण तन्मांसं भक्षयति तावदपरः शृगालः संक्रुद्धः समायातः । तमपि दृष्ट्वेमं श्लोकमपठत् ।

उत्तमं प्रणिपातेन शूरं भेदेन योजयेत् ।
नीचमल्पप्रदानेन समशक्तिं पराक्रमैः ॥ ११४ ॥

ततस्तं जित्वा स्वदंष्ट्राभिर्विदार्य दिशोभागं कृत्वा स्वयं सुखेन चिरकालं तन्मांसं बुभुजे । तत्त्वमपि युद्धेन तं परिभवं नीत्वा दिशोभागं कुरु । नो चेद्विनाशमवाप्स्यसि । उक्तं च ।

संभाव्यं गोषु संपन्न संभाव्यं ब्राह्मणे तपः ।
संभाव्यं स्त्रीषु चापल्यं संभाव्यं ज्ञातितो भयम् ॥ ११५ ॥

तथा च ।

सुभक्ष्याणि विचित्राणि शिथिलाश्चैव योषितः ।

Digitized by Google

एको दोषो विदेशस्य स्वजातिर्यद्विरुध्यते ॥ ११६ ॥

मकर आह । कथमेतत् । सोब्रवीत् ।

कथा १६.

अस्ति कस्मिंश्चिदधिष्ठाने चित्राङ्गो नाम सारमेयः प्रतिवसति स्म । एकदा महदुर्भिक्षमभवत् । अन्नाभावेन सर्वापि सारमेयजातिर्निष्कुलतां गच्छति । अत्रान्तरे स चित्राङ्गः क्षुत्क्षामकण्ठः सुभिक्षं श्रुत्वान्यदेशं गतः । तत्रैकस्मिन्गृहे शिथिलगृहिणीप्रसादेन तत्रैव गच्छति । परं बहिर्निर्गतोन्यैः सारमेयैश्चतुर्दिशं दंष्ट्राभिर्विदार्यते । ततस्तेन विचिन्तितम् । अहो वरं स्वदेशो यत्र दुर्भिक्षेपि सुखेन स्थीयते न कोपि युद्धं करोति । तत्स्वदेशं गच्छामि । इत्यवधार्य तथाकरोत् । अथासौ देशान्तरात्समायातः सर्वैरपि स्वजनैः पृष्टः । भोश्चित्राङ्ग कथयास्माकं देशान्तरवार्ताम् । कीदृग्देशः । किं चेष्टितो लोक इति । स आह । किं कथ्यते देशस्य विषये ।

सुभक्ष्याणि विचित्राणि शिथिलाश्चैव योषितः ।
एको दोषो विदेशस्य स्वजातिर्यद्विरुध्यते ॥ ११७ ॥

सोपि तच्छ्रुत्वा मरणे कृतनिश्चयो भूत्वा वानरमनुज्ञाप्य स्वाश्रयं गतः । तत्र च तेन गृहप्रविष्टेन सह विग्रहं कृत्वा तं व्यापाद्य स्वाश्रयं सुखेनाधिष्ठितवान् । अथ साध्विदमुच्यते ।

अकृत्वा पौरुषं या श्रीः किं तयापि सुभोग्यया ।
जरद्गवोपि नाश्नाति देवादुपगतं तृणम् ॥ ११८ ॥

॥ इति समाप्तं लब्धप्रणाशं नाम चतुर्थं तन्त्रम् ॥

Digitized by Google

अथेदमारभ्यते परीक्षितकारकं नाम पञ्चमं तन्त्रं यस्यायमादिमः श्लोकः ।

कुदृष्टं कुपरिज्ञातं कुश्रुतं कुपरीक्षितम् ।
तत्कारेण न कर्तव्यं नापितेनात्र यत्कृतम् ॥ १ ॥

तद्यथानुश्रूयते ।

कथा १.

अस्ति दाक्षिणात्ये जनपदे पाटलिपुत्रं नाम नगरम् । तत्र मणिभद्रो नाम श्रेष्ठी प्रतिवसति स्म । तस्य च धर्मार्थकामकर्माणि कुर्वतो विधिवशाद्धनक्षयः संजातः । ततो विभवक्षयादपमानपरंपरया परं विषादं गतः । रात्रौ सुप्तश्चिन्तितवान् । अहो धिगियं दरिद्रता । उक्तं च ।

शीलं शौचं क्षान्तिर्दाक्षिण्यं मधुरता कुले जन्म ।
न विराजन्ति हि सर्वे वित्तविहीनस्य पुरुषस्य ॥ २ ॥
मानो वा दर्पो वा विज्ञानं विभ्रमः सुबुद्धिर्वा ।
सर्वं प्रणश्यति सयं वित्तविहीनो यदा पुरुषः ॥ ३ ॥
प्रतिदिवसं याति लयं वसन्तवाताहतेव शिशिरश्रीः ।
बुद्धिर्बुद्धिमतामपि कुटुम्बभरचिन्तया सततम् ॥ ४ ॥
नश्यति विपुलमतेरपि बुद्धिः पुरुषस्य मन्दविभवस्य ।
घृतलवणतैलतण्डुलवस्त्रेन्धनचिन्तया सततम् ॥ ५ ॥
गगनमिव नष्टतारं शुष्कं सरः श्मशानमिव रौद्रम् ।
प्रियदर्शनमपि रूक्षं भवति गृहं धनविहीनस्य ॥ ६ ॥
न विभाव्यन्ते लघवो वित्तविहीनाः पुरोपि निवसन्तः ।
सततं जातविनष्टाः पयसामिव बुद्बुदाः पयसि ॥ ७ ॥

Digitized by Google

सुकुलं कुशलं सुजनं विहाय कुलकुशलशीलविकलेपि ।
आढ्ये कल्पतरविव नित्यं रज्यन्ति जननिवहाः ॥ ८ ॥
विकलमिह पूर्वसुकृतं विद्यावन्तोपि कुलसमुद्भूताः ।
यस्य यदा विभवः स्यात्तस्य तदा दासतां यान्ति ॥ ९ ॥
लघुरयमाह न लोकः कामं गर्जन्तमपि पतिं पयसाम् ।
सर्वमलज्जाकरमिह यत्कुर्वन्तीह परिपूर्णाः ॥ १० ॥

एवं संप्रधार्य भूयोप्यचिन्तयत् । यदहमनशनं कृत्वा प्राणानुत्सृजामि । किमनेन व्यर्थजीवितव्यसनेन । एवं निश्चयं कृत्वा सुप्तः । अथ तस्य स्वप्ने पद्मनिधिः क्षपणकरूपी दर्शनं गत्वा प्रोवाच । भोः श्रेष्ठिन् मा त्वं वैराग्यं गच्छ । अहं पद्मनिधिस्तव पूर्वपुरुषोपार्जितः । तदनेनैव रूपेण प्रातस्त्वद्गृहमागमिष्यामि । तत्त्वयाहं लकुटप्रहारेण शिरसि ताडनीयो येन कनकमयो भूत्वाक्षयो भवामि । अथ प्रातः प्रबुद्धः सन्स्वप्नं स्मरंश्चिन्ताचक्रमारूढस्तिष्ठति । अहो सत्योयं स्वप्नः किंवासत्यो भविष्यति न ज्ञायते । अथवा नूनं मिथ्या भाव्यं यतोहं केवलं वित्तमेव चिन्तयामि । उक्तं च ।

व्याधितेन सशोकेन चिन्ताग्रस्तेन जन्तुना ।
कामार्त्तेनाथ मत्तेन दृष्टः स्वप्नो निरर्थकः ॥ ११ ॥

एतस्मिन्नन्तरे तस्य भार्यया कश्चिन्नापितः पादप्रक्षालनायाहूतः । अत्रान्तरे च यथानिर्दिष्टः क्षपणकः सहसा प्रादुर्बभूव । अथ स तमालोक्य प्रहृष्टमना यथासन्नकाष्ठदण्डेन तं शिरस्यताडयत् । सोपि सुवर्णमयो भूत्वा तत्क्षणाद्भूमौ निपतितः । अथ तं स श्रेष्ठी निभृतं स्वगृहमध्ये कृत्वा नापितं संतोष्य प्रोवाच । यदेतद्धनं

Digitized by Google

वस्त्राणि च मया दत्तानि गृहाण । भद्र पुनः कस्यचिन्नाख्येयो वृत्तान्तः । नापितोपि स्वगृहं गत्वा व्यचिन्तयत् । नूनमेते सर्वेपि नग्नकाः शिरसि दण्डहताः काञ्चनमया भवन्ति । तदहमपि प्रातः प्रभूतानाहूय लकुटैः शिरसि हन्मि येन प्रभूतं हाटकं मे भवति । एवं चिन्तयतो महता कष्टेन निशातिचक्राम । अथ प्रभाते-भ्युत्थाय बृहल्लकुटमेकं प्रगुणीकृत्य क्षपणकविहारं गत्वा जिने-न्द्रस्य प्रदक्षिणात्रयं विधाय जानुभ्यामवनिं गत्वा वक्त्रद्वारन्यस्तो-त्तरीयाञ्चलस्तारस्वरेणेमं श्लोकमपठत् ।

जयन्ति ते जिना येषां केवलज्ञानशालिनाम् ।
आजन्मनः स्मरोत्पत्तौ मानसेनोषरायितम् ॥ १२ ॥

अन्यच्च ।

सा जिह्वा या जिनं स्तौति तच्चित्तं यज्जिने रतम् ।
तावेव च करौ श्लाघ्यौ यौ तत्पूजाकरौ करौ ॥ १३ ॥

तथा च ।

ध्यानव्याजमुपेत्य चिन्तयसि कामुन्मील्य चक्षुः क्षणं
पश्यानङ्गशरानुरञ्जनमिमं त्रातापि नो रक्षसि ।
मिथ्याकारुणिकोसि निर्घृणतरस्त्यक्तः कुतोन्यः पुमान्
सेव्यं मारवधूभिरित्यभिहितो बौद्धो जिनः पातु वः ॥ १४ ॥

एवं संस्तुत्य ततः प्रधानक्षपणकमासाद्य क्षितिनिहितजानुच-रणो नमोस्तु वन्द इत्युच्चार्य लब्धधर्मवृद्ध्याशीर्वादः सुखमालिका-नुग्रहलब्धव्रतादेश उत्तरीयनिबद्धग्रन्थिः सप्रश्रयमिदमाह । भगवन्नद्य विहरणक्रिया समस्तमुनिसमेतेनास्मद्गृहे कर्तव्या । स आह । भोः श्रावक धर्मज्ञोपि किमेवं वदसि । किं वयं ब्राह्मणस-

Digitized by Google

सुकुलं कुशलं सुजनं विहाय कुलकुशलशीलविकलेपि।
आढ्ये कल्पतरावि नित्यं रज्यन्ति जननिवहाः ॥ ८ ॥
विकलमिह पूर्वसुकृतं विद्यावन्तोपि कुलसमुद्भूताः।
यस्य यदा विभवः स्यात्तस्य तदा दासतां यान्ति ॥ ९ ॥
लघुरयमाह न लोकः कामं गर्जन्तमपि पतिं पयसाम्।
सर्वमलज्जाकरमिह यत्कुर्वन्तीह परिपूर्णाः ॥ १० ॥

एवं संप्रधार्य भूयोप्यचिन्तयत्। यदहमनशनं कृत्वा प्राणानुत्सृजामि। किमनेन व्यर्थजीवितव्यसनेन। एवं निश्चयं कृत्वा सुप्तः। अथ तस्य स्वप्ने पद्मनिधिः क्षपणकरूपी दर्शनं गत्वा प्रोवाच। भोः श्रेष्ठिन् मा त्वं वैराग्यं गच्छ। अहं पद्मनिधिस्तव पूर्वपुरुषोपार्जितः। तदनेनैव रूपेण प्रातस्त्वद्गृहमागमिष्यामि। तत्त्वयाहं लकुटप्रहारेण शिरसि ताडनीयो येन कनकमयो भूत्वाक्षयो भवामि। अथ प्रातः प्रबुद्धः सन्स्वप्नं स्मरंश्चिन्ताचक्रमारूढस्तिष्ठति। अहो सत्योयं स्वप्नः किंवासत्यो भविष्यति न ज्ञायते। अथवा नूनं मिथ्या भाव्यं यतोहं केवलं वित्तमेव चिन्तयामि। उक्तं च।

व्याधितेन सशोकेन चिन्ताग्रस्तेन जन्तुना।
कामार्त्तेनाथ मत्तेन दृष्टः स्वप्नो निरर्थकः ॥ ११ ॥

एतस्मिन्नन्तरे तस्य भार्यया कश्चिन्नापितः पादप्रक्षालनायाहूतः। अत्रान्तरे च यथानिर्दिष्टः क्षपणकः सहसा प्रादुर्बभूव। अथ स तमालोक्य प्रहृष्टमना यथासन्नकाष्ठदण्डेन तं शिरस्यताडयत्। सोपि सुवर्णमयो भूत्वा तत्क्षणाद्भूमौ निपतितः। अथ तं स श्रेष्ठी निभृतं स्वगृहमध्ये कृत्वा नापितं संतोष्य प्रोवाच। यदेतद्धनं

Digitized by Google

वस्त्राणि च मया दत्तानि गृहाण । भद्र पुनः कस्यचिन्नाख्येयो वृत्तान्तः । नापितोपि स्वगृहं गत्वा व्याचिन्तयत् । नूनमेते सर्वेपि नग्नकाः शिरसि दण्डहताः काञ्चनमया भवन्ति । तदहमपि प्रातः प्रभूतानाहूय लकुटैः शिरसि हन्मि येन प्रभूतं हाटकं मे भवति । एवं चिन्तयतो महता कष्टेन निशातिचक्राम । अथ प्रभाते-भ्युत्थाय बृहल्लकुटमेकं प्रगुणीकृत्य क्षपणकविहारं गत्वा जिने-न्द्रस्य प्रदक्षिणात्रयं विधाय जानुभ्यामवनिं गत्वा वक्त्रद्वारन्यस्तो-त्तरीयाञ्चलस्तारस्वरेणेमं श्लोकमपठत् ।

जयन्ति ते जिना येषां केवलज्ञानशालिनाम् ।
आजन्मनः स्मरोत्पत्तौ मानसेनोषरायितम् ॥ १२ ॥

अन्यच्च ।

सा जिह्वा या जिनं स्तौति तच्चित्तं यज्जिने रतम् ।
तावेव च करौ श्लाघ्यौ यौ तत्पूजाकरौ करौ ॥ १३ ॥

तथा च ।

ध्यानव्याजमुपेत्य चिन्तयसि कामुन्मील्य चक्षुः क्षणं
पश्यानङ्गशरानुरञ्जनमिमं त्रातापि नो रक्षसि ।
मिथ्याकारुणिकोसि निर्घृणतरस्त्यक्तः कुतोन्यः पुमान्
सेर्ष्यं मारवधूभिरित्यभिहितो बौद्धो जिनः पातु वः ॥ १४ ॥

एवं संस्तुत्य ततः प्रधानक्षपणकमासाद्य क्षितिनिहितजानुच-रणो नमोस्तु वन्द इत्युच्चार्य लब्धधर्मवृद्ध्याशीर्वादः सुखमालिका-नुग्रहलब्धव्रतादेश उत्तरीयनिबद्धग्रन्थिः सप्रश्रयमिदमाह । भगवन्नद्य विहरणक्रिया समस्तमुनिसमेतेनास्मद्गृहे कर्तव्या । स आह । भोः श्रावक धर्मज्ञोपि किमेवं वदसि । किं वयं ब्राह्मणस-

Digitized by Google

माना यत आमन्त्रणं करोषि । वयं सदैव तत्कालपरिचर्यया भ्रमन्तो भक्तिभाजं श्रावकमवलोक्य तस्य गृहे गच्छामस्तेन कृच्छ्रादभ्यर्थिताः । तद्गृहे प्राणधारणमात्रामशनक्रियां कुर्मः । तद्गम्यतां नैवं भूयोपि वाच्यम् । तच्छ्रुत्वा नापित आह । भगवन् वेद्म्यहं युष्मद्धर्मम् । परं भवतो बहुश्रावका आह्वयन्ति । सांप्रतं पुनः पुस्तकाच्छादनयोग्यानि कर्पटानि बहुभूल्यानि प्रगुणीकृतानि । तथा पुस्तकानां लेखनाय लेखकानां च वित्तं दत्तमास्ते । तत्सर्वथा तत्कालोचितं कार्यम् । ततो नापितोपि स्वगृहं गतः । तत्र च गत्वा खादिरमयं लकुटं सज्जीकृत्य कपाटयुगलं द्वारे समाधाय सार्धप्रहरद्वयोद्देशे भूयोपि विहारद्वारमाश्रित्य सर्वान्क्रमेण निष्क्रामतो गुरुप्रार्थनया स्वगृहमानयत् । तेपि सर्वे कर्पटवित्तलोभेन भक्तियुक्तानपि परिचितश्रावकान्परित्यज्य प्रहृष्टमनस्तस्य पृष्ठतो ययुः । अथवा साध्विदमुच्यते ।

एकाकी गृहसंत्यक्तः पाणिपात्रो दिगम्बरः ।
सोपि संवाह्यते लोके तृष्णया पश्य कौतुकम् ॥ १५ ॥
जीर्यन्ते जीर्यतः केशा दन्ता जीर्यन्ति जीर्यतः ।
चक्षुःश्रोत्रे च जीर्येते तृष्णैका तरुणायते ॥ १६ ॥

अपरं गृहमध्ये तान्प्रवेश्य द्वारं निभृतं विधाय लकुटप्रहारैः शिरस्यताडयत् । तेपि ताड्यमाना एके मृता अन्ये भिन्नमस्तकाः फूत्कर्तुमुपचक्रमिरे । अत्रान्तरे तमाक्रन्दमाकर्ण्य कोटरक्षपालैरभिहितम् । भो भोः किमयं महान्कोलाहलो नगरमध्ये । तद्गम्यतां गम्यताम् । ते च सर्वे तदादेशकारिणस्तत्सहिता वेगात्तद्गृहं गताः । तावद्रुधिरप्लावितदेहाः पलायमाना नग्नका दृष्टाः । तैः स नापितो

Digitized by Google

बद्धः। हतशेषैः सह धर्माधिष्ठानं नीतः। तैर्नापितः पृष्टः। भोः किमेतद्भवता कुकृत्यमनुष्ठितम्। स आह। किं करोमि। मया श्रेष्ठिमणिभद्रगृहे दृष्ट एवंविधो व्यतिकरः। सोपि सर्वं मणिभद्रवृत्तान्तं यथादृष्टमकथयत्। ततः श्रेष्ठिनमाहूय भणितवन्तः। भोः श्रेष्ठिन् किं त्वया कश्चित्क्षपणको व्यापादितः। ततस्तेनापि सर्वः क्षपणकवृत्तान्तस्तेषां निवेदितः। अथ तैरभिहितम्।

अहो शूलमारोप्यतामसौ दुष्टात्मा कुपरीक्षितकारी नापितः। तथानुष्ठिते तैरभिहितम्।

कुदृष्टं कुपरिज्ञातं कुश्रुतं कुपरीक्षितम्।
तन्नरेण न कर्तव्यं नापितेनात्र यत्कृतम्॥ १७॥

अथवा साध्विदमुच्यते।

अपरीक्ष्य न कर्तव्यं कर्तव्यं सुपरीक्षितम्।
पश्चाद्भवति संतापो ब्राह्मणी नकुले यथा॥ १८॥

मणिभद्र आह। कथमेतत्। ते धर्माधिकारिणः प्रोचुः।

कथा २.

कस्मिंश्चिदधिष्ठाने देवशर्मा नाम ब्राह्मणः प्रतिवसति स्म। तस्य भार्या प्रसूता सुतमजनयत्। तस्मिन्नेव दिने नकुली नकुलं प्रसूता। अथ सा सुतवत्सला दारकवत्तमपि नकुलं स्तन्यदानाभ्यङ्गपोषणादिभिः पुपोष। परं तस्य न विश्वसिति यत्कदाचिदेष स्वजातिदोषवशादस्य दारकस्य विरुद्धमाचरिष्यतीति। एवं जानाति स्वचित्ते। उक्तं च।

Digitized by Google

कुपुत्रोपि भवेत्पुंसां हृदयानन्दकारकः।
दुर्विनीतः कुरूपोपि मूर्खोपि व्यसनी खलः॥ १९॥
एवं च भाषते लोकश्चन्दनं किल शीतलम्।
पुत्रगात्रस्य संस्पर्शश्चन्दनादतिरिच्यते॥ २०॥
सौहृदस्य न वाञ्छन्ति जनकस्य हितस्य च।
लोकाः प्रपालकस्यापि यथा पुत्रस्य बन्धनम्॥ २१॥

अथ सा कदाचिच्छय्यायां पुत्रं शाययित्वा जलकुम्भमादाय पतिमुवाच। ब्राह्मण जलार्थमहं तडागे यास्यामि। त्वया पुत्रोयं नकुलाद्रक्षणीयः। अथ तस्यां गतायां पृष्ठे ब्राह्मणोपि शून्यं गृहं मुक्त्वा भिक्षार्थं क्वचिन्निर्गतः। अत्रान्तरे दैववशात्कृष्णसर्पो बिलान्निष्क्रान्तः। नकुलोपि तं स्वभाववैरिणं मत्वा भ्रातू रक्षणार्थं सर्पेण सह युद्ध्वा सर्पं खण्डशः कृतवान्। ततो रुधिराप्लावितवदनः सानन्दं स्वव्यापारप्रकाशनार्थं मातुः संमुखो गतः। मातापि तं रुधिरक्लिन्नमुखमवलोक्य शङ्कितचित्ता यदनेन दुरात्मना दारको भक्षित इति विचिन्त्य कोपात्तस्योपरि तं जलकुम्भं चिक्षेप। एवं सा नकुलं व्यापाद्य यावत्प्रलपन्ती गृह आगच्छति तावत्सुतस्तथैव सुप्तस्तिष्ठति। समीपे कृष्णसर्पं खण्डशः कृतमवलोक्य पुत्रवधशोकेनात्मशिरो वक्षःस्थलं च ताडयितुमारब्धा। अत्रान्तरे ब्राह्मणो गृहीतनिर्वापः समायातो यावत्पश्यति तावत्पुत्रशोकाभितप्ता ब्राह्मणी प्रलपति। भो भो लोभात्मन् लोभाभिभूतेन त्वया न कृतं मद्वचः। तदनु तव सांप्रतं पुत्रमृत्युदुःखवृक्षफलम्। अथवा साध्विदमुच्यते।

अतिलोभो न कर्तव्यो लोभं नैव परित्यजेत्।

Digitized by Google

अतिलोभाभिभूतस्य चक्रं भ्रमति मस्तके ॥ २२ ॥

ब्राह्मण आह । कथमेतत् । सा प्राह ।

कथा ३.

कस्मिंश्चिदधिष्ठाने चत्वारो ब्राह्मणपुत्राः परस्परं मित्रतां गता वसन्ति स्म । ते चापि दारिद्र्योपहताः परस्परं मन्त्रं चक्रुः । अहो धिगियं दरिद्रता । उक्तं च ।

वरं वनं व्याघ्रगजादिसेवितं
जलेन हीनं बहुकण्टकावृतम् ।
तृणानि शय्या परिधानवल्कलं
न बन्धुमध्ये धनहीनजीवितम् ॥ २३ ॥

तथा च ।

स्वामी द्वेष्टि सुसेवितोपि सहसा प्रोज्झन्ति सद्बान्धवा
राजन्ते न गुणास्त्यजन्ति तनुजाः स्फारीभवन्त्यापदः ।
भार्या साधुसुवंशजापि भजते नो यान्ति मित्राणि च
न्यायारोपितविक्रमाण्यपि नृणां येषां न हि स्याद्धनम् ॥ २४ ॥

शूरः सुरूपः सुभगश्च वाग्मी
शस्त्राणि शास्त्राणि विदांकरोति ।
अर्थं विना नैव यशश्च मानं
प्राप्नोति मर्त्योत्र मनुष्यलोके ॥ २५ ॥
तानीन्द्रियाण्यविकलानि तदेव नाम
सा बुद्धिरप्रतिहता वचनं तदेव ।

Digitized by Google

अर्थोष्मणा विरहितः पुरुषः स एव
बाह्यः क्षणेन भवतीति विचित्रमेतत् ॥ २६ ॥

तद्गच्छामः कुत्रचिदर्थाय । इति संमन्त्र्य स्वदेशं पुरं च स्वसुहृत्सहितं बान्धवयुतं गृहं च परित्यज्य प्रस्थिताः । अथवा साध्विदमुच्यते ।

सत्यं परित्यजति मुञ्चति बन्धुवर्गं
शीघ्रं विहाय जननीमपि जन्मभूमिम् ।
संत्यज्य गच्छति विदेशमभीष्टलोकं
चिन्ताकुलीकृतमतिः पुरुषोत्र लोके ॥ २७ ॥

एवं क्रमेण गच्छन्तोवन्तीं प्राप्ताः । तत्र सिप्राजले कृतस्नाना महाकालं प्रणम्य यावन्निर्गच्छन्ति तावद्भैरवानन्दो नाम योगी संमुखो बभूव । ततस्तं ब्राह्मणोचितविधिना संभाव्य तेनैव सह तस्य मठं जग्मुः । अथ तेन ते पृष्टाः । कुतो भवन्तः समायाताः । क्व यास्यथ । किं प्रयोजनम् । ततस्तैरभिहितम् । वयं सिद्धियात्रिकास्तत्र यास्यामो यत्र धनान्निर्मृत्युर्वा भविष्यतीत्येष निश्चयः । उक्तं च ।

दुष्प्राप्याणि बहूनि च लभ्यन्ते वाञ्छितानि द्रविणानि ।
अवसरतुलिताभिरलं तनुभिः साहसिकपुरुषाणाम् ॥ २८ ॥

तथा च ।

पतति कदाचिन्नभसः खाते पातालतोपि जलमेति ।
दैवमचिन्त्यं कारणबलवान्ननु पुरुषकारोपि ॥ २९ ॥
अभिमतसिद्धिरशेषा भवति हि पुरुषस्य पुरुषकारेण ।
दैवमिति यदपि कथयसि पुरुषगुणः सोप्यदृष्टाख्यः ॥ ३० ॥

Digitized by Google

भयमतुलं गुरुलोकात्तृणमिव तुलयन्ति साधु साहसिकाः।
प्राणानद्भुतमेतच्चरितं चरितं ह्युदाराणाम् ॥ ३१ ॥
क्लेशस्याङ्कमदत्त्वा सुखमेव सुखानि नेह लभ्यन्ते।
मधुभिन्मथनायस्तैराश्लिष्यति बाहुभिर्लक्ष्मीम् ॥ ३२ ॥
तस्य कथं न चला स्यात्पत्नी विष्णोर्नृसिंहकस्यापि।
मासांश्चतुरो निद्रां यः सेवति जलगतः सततम् ॥ ३३ ॥
दुरधिगमः परभागो यावत्पुरुषेण पौरुषं न कृतम्।
जयति तुलामधिरूढो भास्वानिह जलदपटलानि ॥ ३४ ॥

तत्कथ्यतामस्माकं कश्चिद्धनोपायो विवरप्रवेशशाकिनीसाधन-
श्मशानसेवनमहामांसविक्रयसाधकवर्तिप्रभृतीनामेकतम इति। अद्भुतशक्तिर्भवाञ्श्रूयते। वयमप्यतिसाहसिकाः। उक्तं च।

महान्त एव महतामर्थं साधयितुं क्षमाः।
ऋते समुद्रादन्यः को बिभर्ति वडवानलम् ॥ ३५ ॥

भैरवानन्दोपि तेषां सिद्ध्यर्थं बहूपायं सिद्धिवर्तिंचतुष्टयं कृत्वार्पयत्। आह च। गम्यतां हिमालयदिशि। तत्र संप्राप्तानां यत्र वर्तिः पतिष्यति तत्र निधानं प्राप्स्यथासंदिग्धम्। तत्र स्थानं खनित्वा निधिं गृहीत्वा व्याघुद्यताम्। तथानुष्ठिते तेषां गच्छतामेकतमस्य हस्ताद्वर्तिर्निपपात। अथासौ यावत्तं प्रदेशं खनति तावत्ताम्रमयी भूमिः। ततस्तेनाभिहितम्। अहो गृह्यतां स्वेच्छया ताम्रम्। अन्ये प्रोचुः। भो मूढ किमनेन क्रियते। तत्प्रभूतमपि दारिद्र्यं न नाशयति। तदुत्तिष्ठाग्रतो गच्छामः। सोब्रवीत्। यान्तु भवन्तो। नाहमग्रे यास्यामि। एवमभिधाय ताम्रं यथेच्छया गृहीत्वा प्रथमो निवृत्तः। ते त्रयोप्यग्रे प्रस्थिताः।

Digitized by Google

अथ किंचिन्मात्रं गतस्याग्रेसरस्य वार्तिर्निपपात । सोपि यावत्खनितुमारब्धस्तावद्रूप्यमयी क्षितिः । ततः प्रहर्षितः प्राह । यद्भो गृह्यतां यथेच्छया रूप्यम् । नाग्रे गन्तव्यम् । तावूचतुः । भोः पृष्ठतस्ताम्रमयी भूमिरग्रतो रूप्यमयी । तन्नूनमग्रे सुवर्णमयी भविष्यति । तदनेन प्रभूतेनापि दारिद्र्यनाशो न भवति । तदावामग्रे यास्यावः । एवमुक्त्वा द्वावप्यग्रे प्रस्थितौ । सोपि स्वशक्त्या रूप्यमादाय निवृत्तः । तयोरपि गच्छतोरेकस्याग्रे वार्तिः पपात । सोपि प्रहृष्टो यावत्खनति तावत्सुवर्णभूमिं दृष्ट्वा द्वितीयं प्राह । भो गृह्यतां स्वेच्छया सुवर्णम् । सुवर्णादन्यन्न किंचिदुत्तमं भविष्यति । स प्राह । मूढ न किंचिद्वेत्सि । प्राक्ताम्रं ततो रूप्यं ततः सुवर्णं तन्नूनमतः परं रत्नानि भविष्यन्ति येषामेकतमेनापि दारिद्र्यनाशो भवति । तदुत्तिष्ठाग्रे गच्छावः । किमनेन भारभूतेनापि प्रभूतेन । स आह । गच्छतु भवान् । अहमत्र स्थितस्त्वां प्रतिपालयिष्यामि । तथानुष्ठिते सोपि गच्छन्नेकाकी ग्रीष्मार्कप्रतापसंतप्ततनुः पिपासाकुलितः सिद्धिमार्गच्युत इतश्चेतश्च बभ्राम । अथ भ्राम्यन्स्थलोपरि पुरुषमेकं रुधिरप्लावितगात्रं भ्रमच्चक्रमस्तकमपश्यत् । ततो द्रुततरं गत्वा तमवोचत् । भोः को भवान् । किमेवं चक्रेण भ्रमता शिरसि तिष्ठसि । तत्कथय मे यदि कुत्रचिज्जलमस्ति । एवं तस्य प्रवदतस्तच्चक्रं तत्क्षणात्तस्य शिरसो ब्राह्मणमस्तके चटितम् । स आह । भद्र किमेतत् । स आह । यन्मयाप्येवमेवैतच्छिरसि चटितम् । तत्कथय कदैतदुत्तरिष्यति । महती मे वेदना वर्तते । स आह । यदा त्वमिव कश्चिद्भूतसिद्धिवार्तिरेवमागत्य त्वामालापयिष्यति तदा तस्य

Digitized by Google

मस्तके चटिष्यति । स आह । कियान्कालस्तवैवं स्थितस्य । स आह । सांप्रतं को राजा धरणीतले । स आह । वीणावत्सराजः । स आह । अहं तावत्कालसंख्यां न जानामि । परं यदा रामो राजासीत्तदाहं दारिद्र्योपहतः सिद्धिवर्तिमादायानेन पथा समायातः । ततो मयान्यो नरो मस्तकधृतचक्रो दृष्टः पृष्टश्च । ततश्चैतज्जातम् । स आह । भद्र कथं तवैवं स्थितस्य भोजनजलप्राप्तिरासीत् । स आह । भद्र धनदेन निधानहरणभयात्सिद्धानामेतद्भयं दर्शितम् । तेन कश्चिदपि नागच्छति । यदि कश्चिदायाति स क्षुत्पिपासानिद्रारहितो जरामरणवर्जितः केवलमेवं वेदनामनुभवतीति । तदाज्ञापय मां मुक्तोस्मि । सांप्रतं स्वगृहं यास्यामि । इत्युक्त्वा गतः । अथ तस्मिंश्चिरयति स सुवर्णसिद्धिस्तस्यान्वेषणपरस्तत्पदपङ्क्त्या यावत्किंचिद्दूनान्तरमागच्छति तावद्बुधिरप्लावितशरीरस्तीक्ष्णचक्रेण मस्तके भ्रमता सवेदनः क्वणन्नुपविष्टस्तिष्ठति । ततः समीपवर्तिना भूत्वा सवाष्पं पृष्टः । भद्र किमेतत् । स आह । विधिनियोगः । स आह । कथं तत् । कथय कारणमेतस्य । सोपि तेन पृष्टः सर्वं चक्रवृत्तान्तमकथयत् । तच्छ्रुत्वासौ तं विगर्हयन्निदमाह । भो निषिद्धस्त्वं मयानेकशो न शृणोषि मे वाक्यम् । तत्किं क्रियते । विद्यावानपि कुलीनोपि बुद्धिरहितः । अथवा साध्विदमुच्यते ।

वरं बुद्धिर्न सा विद्या विद्याया बुद्धिरुत्तमा ।
बुद्धिहीना विनश्यन्ति यथा ते सिंहकारकाः ॥ ३६ ॥

चक्रधर आह । कथमेतत् । सुवर्णसिद्धिराह ।

Digitized by Google

कथा ४.

कस्मिंश्चिदधिष्ठाने चत्वारो ब्राह्मणपुत्राः परं मित्रभावमुपगता वसन्ति स्म । तेषां त्रयः शास्त्रपारं गताः परं तु बुद्धिरहिताः । एकस्तु बुद्धिमान्केवलं शास्त्रपराङ्मुखः । अथ तैः कदाचिन्मित्रैर्मन्त्रितम् । को गुणो विद्याया येन देशान्तरं गत्वा भूपतीन्परितोष्यार्थोपार्जना न क्रियते । तत्पूर्वदेशं गच्छामः । तथानुष्ठिते किंचिन्मार्गं गत्वा तेषां ज्येष्ठतरः प्राह । अहो अस्माकमेकश्चतुर्थो मूढः केवलं बुद्धिमान् । न च राजप्रतिग्रहो बुद्ध्या लभ्यते विद्यां विना । तन्नास्मै स्वोपार्जितं दास्यामि । तद्गच्छतु गृहम् । ततो द्वितीयेनाभिहितम् । भोः सुबुद्धे गच्छ त्वं स्वगृहे यतस्ते विद्या नास्ति । ततस्तृतीयेनाभिहितम् । अहो न युज्यते एवं कर्तुं यतो वयं बाल्यात्प्रभृत्येकत्र क्रीडिताः । तदागच्छतु महानुभावोस्मदुपार्जितवित्तस्य संविभागी भविष्यतीति । उक्तं च ।

किं तया क्रियते लक्ष्म्या या वधूरिव केवला ।
या न वेश्येव सामान्या पथिकैरुपभुज्यते ॥ ३७ ॥

तथा च ।

अयं निजः परो वेति गणना लघुचेतसाम् ।
उदारचरितानां च वसुधैव कुटुम्बकम् ॥ ३८ ॥

तदागच्छत्वेषोपीति । तथानुष्ठिते तैर्मार्गाश्चितैरटव्यां मृतसिंहस्यास्थीनि दृष्टानि । ततश्चैकेनाभिहितम् । यदहो विद्याप्रत्ययः क्रियते । किंचिदेतत्सत्त्वं मृतं तिष्ठति । तद्विद्याप्रभावेन जीवसहितं कुर्मः । अहमस्थिसंचयं करोमि । ततश्चैकेनौत्सुक्यादस्थिसंचयः

Digitized by Google

कृतः। द्वितीयेन चर्ममांसरुधिरं संयोजितम्। तृतीयोपि यावज्जीवं संचारयति तावत्सुबुद्धिना निषिद्धः। भोस्तिष्ठतु भवान्। एष सिंहो निष्पाद्यते। यद्येनं सजीवं करिष्यसि ततः सर्वानपि व्यापादयिष्यति। इति तेनाभिहितः स आह। धिङ्मूर्ख नाहं विद्याया विफलतां करोमि। ततस्तेनाभिहितम्। तर्हि प्रतीक्षस्व क्षणं यावदहं वृक्षमारोहामि। तथानुष्ठिते यावत्सजीवः कृतस्तावत्ते त्रयोपि सिंहेनोत्थाय व्यापादिताः। स च पुनर्वृक्षादवतीर्य गृहे गतः। अतोहं ब्रवीमि।

वरं बुद्धिर्न सा विद्या विद्याया बुद्धिरुत्तमा।
बुद्धिहीना विनश्यन्ति यथा ते सिंहकारकाः॥ ३९॥

अतः परयुक्तं च।

अपि शास्त्रेषु कुशला लोकाचारविवर्जिताः।
सर्वे ते हास्यतां यान्ति यथा ते मूर्खपण्डिताः॥ ४०॥

चक्रधर आह। कथमेतत्। सोब्रवीत्।

कथा ६.

कस्मिंश्चिदधिष्ठाने चत्वारो ब्राह्मणाः परस्परं मित्रत्वमापन्ना वसन्ति स्म। बालभावे तेषां मतिरजायत। भो देशान्तरं गत्वा विद्याया उपार्जनं क्रियते। अथान्यस्मिन्दिवसे ब्राह्मणाः परस्परं निश्चयं कृत्वा विद्योपार्जनार्थं कन्यकुब्जे गताः। तत्र च विद्यामठे गत्वा पठन्ति। एवं द्वादशाब्दानि यावदेकचित्ततया विद्याकुशलास्ते सर्वे संजाताः। ततस्तैश्चतुर्भिर्मिलित्वोक्तम्। वयं सर्वविद्यापारे गताः। तदुपाध्यायमुत्कलापयित्वा स्वदेशं गच्छामः। तथैव

Digitized by Google

क्रियतामित्युक्त्वा ब्राह्मणा उपाध्यायमुत्कलापयित्वानुज्ञां लब्ध्वा पुस्तकानि नीत्वा प्रचलिताः । यावत्किंचिन्मार्गं यान्ति तावद्वौ पन्थानौ समायातौ । उपविष्टाः सर्वे । तत्रैकः प्रोवाच । केन मार्गेण गच्छामः । एतस्मिन्समये तस्मिन्पत्तने कश्चिद्वणिक्पुत्रो मृतः । तस्य दाहार्थे महाजनो गतोभूत् । ततश्चतुर्णां मध्यादेकेन पुस्तकमवलोकितम् । महाजनो येन गतः स पन्था इति तन्महाजनमार्गेण गच्छामः । अथ ते पण्डिता यावन्महाजनमेलापकेन सह यान्ति तावद्रासभः कश्चित्तत्र श्मशाने दृष्टः । अथ द्वितीयेन पुस्तकमुद्घाट्यावलोकितम् ।

आतुरे व्यसने प्राप्ते दुर्भिक्षे शत्रुसंकटे ।
राजद्वारे श्मशाने च यस्तिष्ठति स बान्धवः ॥ ४१ ॥

तदहो अयमस्मदीयो बान्धवः । ततः कश्चित्तस्य ग्रीवायां लगति । कोपि पादौ प्रक्षालयति । अथ यावद्दिशामवलोकनं ते पण्डिताः कुर्वन्ति तावत्कश्चिद्दुष्टो दृष्टः । तैश्चोक्तम् । एतत्किम् । तावत्तृतीयेन पुस्तकमुद्घाट्योक्तम् । धर्मस्य त्वरिता गतिः । एष धर्मस्तावत् । चतुर्थेनोक्तम् । इष्टं धर्मेण योजयेत् । अथ तैश्च रासभ उष्ट्रग्रीवायां बद्धः । केनचिद्व्रजकस्याग्रे कथितम् । यावद्व्रजकस्तेषां मूर्खपण्डितानां प्रहारकरणाय समायातस्तावत्ते प्रनष्टाः यावदग्रे किंचित्स्तोकं मार्गं यान्ति तावत्काचिन्नद्यासादिता । तत्तस्या जलमध्ये पलाशपत्त्रमायातं दृष्ट्वा पण्डितेनैकेनोक्तम् । आगमिष्यति यत्पत्त्रं तदस्मांस्तारयिष्यति । एतत्कथयित्वा तत्पत्त्रस्योपरि पतितो यावन्नद्या नीयते तावत्तं नीयमानमवलोक्यान्येन पण्डितेन केशान्तं गृहीत्वोक्तम् ।

Digitized by Google

सर्वनाशे समुत्पन्ने अर्धं त्यजति पण्डितः।
अर्धेन कुरुते कार्यं सर्वनाशो हि दुःसहः॥ ४२॥

इत्युक्त्वा तस्य शिरश्छेदो विहितः। अथ तैश्च पक्षाद्वत्वा कश्चिद्ग्राम आसादितः। तेपि ग्रामीणैर्निमन्त्रिताः पृथक्पृथग्गृहेषु नीताः। तत एकस्य सूत्रिका घृतखण्डसंयुक्ता भोजने दत्ता। ततो विचिन्त्य पण्डितेनोक्तम्। यद्दीर्घसूत्री विनश्यति। एवमुक्त्वा भोजनं परित्यज्य गतः। तथा द्वितीयस्य मण्डका दत्ताः। तेनाप्युक्तम्। अतिविस्तरविस्तीर्णं न तद्भवेच्चिरायुषम्। स च भोजनं त्यक्त्वा गतः। अथ तृतीयस्य वटिकाभोजनं दत्तम्। तत्रापि पण्डितेनोक्तम्। छिद्रेष्वनर्था बहुलीभवन्ति। एवं तेपि त्रयः पण्डिताः क्षुत्क्षामकण्ठा लोकैर्हास्यमानास्ततः स्थानात्स्वदेशं गताः। अथ सुवर्णसिद्धिराह। यत्त्वं लोकव्यवहारमजानन्मया वार्यमाणोपि न स्थितः। तत ईदृशीमवस्थामुपगतः। अतोहं ब्रवीमि।

अपि शास्त्रेषु कुशला लोकाचारविवर्जिताः।
सर्वे ते हास्यतां यान्ति यथा ते मूर्खपण्डिताः॥ ४३॥

तच्छ्रुत्वा चक्रधर आह। अहो अकारणमेतत्। बहुबुद्धयोपि विनश्यन्ति दुष्टदैवेन नाशिताः। स्वल्पबुद्धयोप्येकस्मिन्कुले नन्दन्ति संततम्। उक्तं च।

अरक्षितं तिष्ठति दैवरक्षितं सुरक्षितं दैवहतं विनश्यति।
जीवत्यनाथोपि वने विसर्जितः कृतप्रयत्नोपि गृहे न जीवति॥ ४४॥

तथा च।

शतबुद्धिः कृतोन्नामः सलम्बश्च सहस्रधीः।
एकबुद्धिरहं भद्रे क्रीडामि विमले जले॥ ४५॥

Digitized by Google

सुवर्णसिद्धिराह । कथमेतत् । स आह ।

कथा ६.

कस्मिंश्चिज्जलाशये शतबुद्धिः सहस्रबुद्धिश्च द्वौ मत्स्यौ निवसतः । अथ तयोरेकबुद्धिर्नाम मण्डूको मित्रतां गतः । एवं ते त्रयोपि जलतीरे कंचित्कालं वेलायां सुभाषितगोष्ठीसुखमनुभूय भूयोपि सलिलं प्रविशन्ति । अथ कदाचित्तेषां गोष्ठीगतानां जालहस्तधीवराः प्रभूतैर्मत्स्यैर्व्यापादितैर्मस्तके विधृतैरस्तमनवेलायां तस्मिञ्जलाशये समायाताः । ततः सलिलाशयं दृष्ट्वा मिथः प्रोचुः । अहो बहुमत्स्योयं ह्रदो दृश्यते स्वल्पसलिलश्च । तत्प्रभातेत्रागमिष्यामः । एवमुक्त्वा स्वगृहं गताः । मत्स्याश्च विषण्णवदना मिथो मन्त्रं चक्रुः । ततो मण्डूक आह । भोः शतबुद्धे श्रुतं धीवरोक्तं भवद्भ्याम् । तत्किमत्र युज्यते कर्तुं । पलायनमवष्टम्भं वा । यत्कर्तुं युक्तं भवति तदादिश्यतामद्य । तच्छ्रुत्वा सहस्रबुद्धिः प्रहस्य प्राह । भोः पुत्र मा भैषीर्यतो वचनस्मरणमात्रादेव भयं न कार्यम् । न भेतव्यम् । उक्तं च ।

सर्पाणां च खलानां च सर्वेषां दुष्टचेतसाम् ।
अभिप्राया न सिद्ध्यन्ति तेनेदं वर्तते जगत् ॥ ४६ ॥

तत्तावत्तेषामागमनमपि न संपत्स्यते । भविष्यति वा तर्हि त्वा बुद्धिप्रभावेनात्मसहितं रक्षयिष्यामि यतोनेकां सलिलगतिचर्यामहं जानामि । तदाकर्ण्य शतबुद्धिराह । भो युक्तमुक्तं भवता । सहस्रबुद्धिरेव भवान् । अथवा साध्विदमुच्यते ।

बुद्धेर्बुद्धिमतां लोके नास्त्यगम्यं हि किंचन ।

Digitized by Google

बुद्ध्या यतो हता नन्दाश्चाणक्येनासिपाणयः ॥ ४७ ॥

तथा च ।

न यत्रास्ति गतिर्वायो रश्मीनां च विवस्वतः ।

तत्रापि प्रविशत्याशु बुद्धिर्बुद्धिमतां सदा ॥ ४८ ॥

ततो वचनश्रवणमात्रादपि पितृपर्यायागतं जन्मस्थानं त्यक्तुं न शक्यते । उक्तं च ।

न तत्स्वर्गेपि सौख्यं स्याद्दिव्यस्पर्शनशोभने ।

कुस्थानेपि भवेत्पुंसां जन्मनो यत्र संभवः ॥ ४९ ॥

तन्न कदाचिदपि गन्तव्यम् । अहं त्वां सुबुद्धिप्रभावेन रक्षयिष्यामि । मण्डूक आह । भद्रौ मम तावदेकैव बुद्धिः पलायनपरा । तदहमन्यं जलाशयमद्यैव सभार्यो यास्यामि । एवमुक्त्वा स मण्डूको रात्रावेवान्यजलाशयं गतः । धीवरैरपि प्रभात आगत्य स्वयन्यमध्यमोत्तमजलचरा मत्स्यकूर्ममण्डूककर्कटादयो गृहीताः । तावपि शतबुद्धिसहस्रबुद्धी सभार्यौ पलायमानौ चिरमात्मानं गतविशेषविज्ञानै रक्षन्तौ जाले पतितौ व्यापादितौ च । अथापराण्हसमये प्रहृष्टास्ते धीवराः स्वगृहं प्रति प्रस्थिताः । गुरुत्वादेकेन शतबुद्धिः स्कन्धे कृतः । सहस्रबुद्धिः प्रलम्बमानो नीयते । ततश्च वापीकण्ठोपगतेन मण्डूकेन तौ तथा नीयमानौ दृष्ट्वाभिहिता स्वपत्नी । प्रिये पश्य पश्य ।

शतबुद्धिः कृतोन्नामो लम्बते च सहस्रधीः ।

एकबुद्धिरहं भद्रे क्रीडामि विमले जले ॥ ५० ॥

अतोहं ब्रवीमि । नैकान्ते बुद्धिरपि प्रमाणम् । सुवर्णसिद्धिराह । यद्यप्येतदस्ति तथापि मित्रवचनमनुल्लङ्घनीयम् । परं किं क्रियते ।

Digitized by Google

निवारितोपि मया न स्थितोतिलौल्यादिहाहंकाराच्च । अथवा साध्विदमुच्यते ।

साधु मातुल गीतेन मया प्रोक्तोपि न स्थितः ।
अपूर्वोयं मणिर्बद्धः संप्राप्तं गीतलक्षणम् ॥ ५१ ॥

चक्रधर आह । कथमेतत् । सोब्रवीत् ।

कथा ७.

कस्मिंश्चिदधिष्ठाने उद्धतो नाम गर्दभः प्रतिवसति स्म । स सदैव रजकगृहे कर्म कृत्वा रात्रौ स्वेच्छया पर्यटति । ततः प्रत्यूषे बन्धनभयात्स्वयमेव रजकगृहमायाति । रजकोपि ततस्तं बन्धनेन नियुनक्ति । अथ तस्य रात्रौ पर्यटतः क्षेत्राणि कदाचिच्छृगालेन सह मैत्री संजाता । स च पीवरत्वादृतिभङ्गं कृत्वा कर्कटिकाक्षेत्रे शृगालसहितः प्रविशति । एवं तौ यदृच्छया चिर्भटिकाभक्षणं कृत्वा प्रत्यहं प्रत्यूषे स्वस्थानं व्रजतः । अथ कदाचित्तेन मदोद्धतेन रासभेन क्षेत्रमध्यस्थितेन शृगालोभिहितः । भो भगिनीसुत पश्य पश्य । अतीव निर्मला रजनी । तदहं गीतं करिष्यामि । तत्कथय कतमेन रागेण करोमि । स आह । मामक किमनेन वृथार्थप्रचालनेन यतश्चौरकर्मप्रवृत्तावावां निभृतैश्च चौरजारैरत्र स्थातव्यम् । उक्तं च ।

काशी विवर्जयेच्चौर्यं निद्रालुश्च स चौरिकाम् ।
जिह्वालौल्यं रुजाक्रान्तो जीवितं योत्र वाञ्छति ॥ ५२ ॥

अपरं त्वदीयं गीतं न मधुरस्वरम् । शङ्खशब्दानुकारं दूरादपि श्रूयते । तदत्र क्षेत्रे रक्षापुरुषाः सुप्ताः सन्ति । त उत्थाय वधं बन्धं वा करिष्यन्ति । तद्भक्षय तावदमृतमयाश्चिर्भटीः । मा त्वम-

Digitized by Google

व्यापारपरो भव । तच्छ्रुत्वा रासभ आह । भो न त्वं वेत्सि गीतरसं वनाश्रयत्वात् । तेनैतद्ब्रवीषि । उक्तं च ।

शरज्ज्योत्स्नाहते दूरं तमसि प्रियसंनिधौ ।
धन्यानां जायते कर्णे गीतझंकारजा सुधा ॥ ५३ ॥

शृगाल आह । माम अस्त्येतत्परं न वेत्सि त्वं गीतम् । केवलमुन्नदसि । तत्किं तेन स्वार्थभ्रंशकेन । रासभ आह । धिग्धिङ्मूर्ख किमहं न जानामि गीतम् । तद्यथा तस्य भेदाञ्छृणु ।

सप्त स्वरास्त्रयो ग्रामा मूर्छनाश्चैकविंशतिः ।
तानास्त्वेकोनपञ्चाशदित्येतत्स्वरमण्डलम् ॥ ५४ ॥
स्थानत्रयं यतीनां च षडास्यानि रसा नव ।
रागाः षट्त्रिंशतिर्भावाश्चत्वारिंशत्तथा स्मृताः ५५ ॥
पञ्चाशीत्यधिकं ह्येतद्गीताङ्गानां शतं स्मृतम् ।
स्वयमेव पुरा प्रोक्तं भरतेन श्रुतेः परम् ॥ ५६ ॥
नान्यद्गीतात्प्रियं लोके देवानामपि दृश्यते ।
शुष्ककाष्ठायुस्यराल्हादाच्छ्यक्षं जग्राह रावणः ॥ ५७ ॥

तत्कथं भगिनीसुत मामनभिज्ञं वदन्निवारयसि । शृगाल आह । माम यद्येवं तदहं तावद्गृहेद्वारस्थितः क्षेत्रपमवलोकयामि । त्वं पुनः स्वेच्छया गीतं कुरु । तथानुष्ठिते रासभरटनमाकर्ण्य क्षेत्रपः क्रोधाद्दन्तान्यर्षयन्प्रधावितः । यावद्रासभो दृष्टस्तावल्लकुटप्रहारैस्तथा हतो यथा प्रताडितो भूपृष्ठे पतितः । ततश्च सच्छिद्रोलूखले बद्ध्वा गतो भूयोपि प्रसुप्तः । रासभोपि स्वजातिस्वभावाद्गतवेदनः क्षणेनाभ्युत्थितः । उक्तं च ।

Digitized by Google

सारमेयस्य चाश्वस्य रासभस्य विशेषतः ।
मुहूर्तात्परतो न स्यात्प्रहारजनिता व्यथा ॥ ५८ ॥

ततस्तमेवोलूखलमादाय वृत्तिं चूर्णयित्वा पलायितुमारब्धः । अत्रान्तरे शृगालोपि दूरादेव तं दृष्ट्वा सस्मितमाह ।

साधु मातुल गीतेन मया प्रोक्तोपि न स्थितः ।
अपूर्वोयं मणिर्बद्धः संप्राप्तं गीतलक्षणम् ॥ ५९ ॥

तद्भवानपि मया वार्यमाणोपि न स्थितः । तच्छ्रुत्वा चक्रधर आह । भो मित्र सत्यमेतत् । अथवा साध्विदमुच्यते ।

यस्य नास्ति स्वयं प्रज्ञा मित्रोक्तं न करोति यः ।
स एव निधनं याति यथा मन्थरकौलिकः ॥ ६० ॥

सुवर्णसिद्धिराह । कथमेतत् । सोब्रवीत् ।

कथा ८.

कस्मिंश्चिदधिष्ठाने मन्थरको नाम कौलिकः प्रतिवसति स्म । तस्य कदाचित्पट्टकर्माणि कुर्वतः सर्वपट्टकर्मकाष्ठानि भग्नानि । ततः स कुठारमादाय वने काष्ठार्थं गतः । स च समुद्रतटं यावद्भ्रमन्प्रयातः । ततश्च तत्र शिंशपापादपस्तेन दृष्टः । ततश्चिन्तितवान् । महानयं वृक्षो दृश्यते । तदनेन कर्तितेन प्रभूतानि पट्टकरणकृत्यानि भविष्यन्ति । इत्यवधार्य तस्योपरि कुठारमुक्षिप्तवान् । अथ तत्र वृक्षे कश्चिद्यन्तरः समाश्रित आसीत् । अथ तेनाभिहितम् । भो मदाश्रयोयं पादपः सर्वथा रक्षणीयो यद्वोहमत्र महा-

Digitized by Google

सौख्येन तिष्ठामि समुद्रकल्लोलस्पर्शनाच्छीतवायुनाप्यायितः । कौलिक आह । भोः किमहं करोमि दारुसामग्रीं विना मे कुटुम्बं बुभुक्षया पीड्यते । तस्मादन्यत्र शीघ्रं गम्यताम् । अहमेनं कर्तयिष्यामि । व्यन्तर आह । भोस्तुष्टस्तवाहम् । तत्प्रार्थ्यताम-
5 भीष्टं किंचित् । रक्षैनं पादपमिति । कौलिक आह । यद्येवं तदहं स्वगृहं गत्वा स्वमित्रं स्वभार्यां च पृष्ट्वागमिष्यामि । ततस्त्वया देयम् । अथ तथेति प्रतिज्ञाते व्यन्तरेण स कौलिकः प्रहृष्टः स्वगृहं प्रति निवृत्तः । यावदग्रे गच्छति तावद्ग्रामप्रवेशे निजसुहृदं नापितमपश्यत् । ततस्तस्य व्यन्तरवाक्यं निवेदयामास । यदहो
10 मित्र मम कश्चिद्व्यन्तरः सिद्धः । तत्कथय किं प्रार्थयामि । अहं त्वां प्रष्टुमागतः । नापित आह । भद्र यद्येवं तद्राज्यं प्रार्थय येन त्वं राजा भवस्यहं त्वन्मन्त्री । द्वावपीह सुखमनुभूय परलोकसुखमनुभवावः । उक्तं च ।

राजा व्यपपरो नित्यमिह कीर्तिमवाप्य च ।
15 तत्प्रभावात्पुनः स्वर्गे स्पर्धते त्रिदशैः सह ॥ ६१ ॥

कौलिक आह । अस्त्येतत्परं तथापि गृहिणीं पृच्छामि । स आह । भद्र शास्त्रविरुद्धमेतद्यत्स्त्रिया सह मन्त्रो यतस्ताः स्वल्पमतयो भवन्ति । उक्तं च ।

भोजनाच्छादने दद्यादृतुकाले च संगमम् ।
20 भूषणाद्यं च नारीणां न ताभिर्मन्त्रयेत्सुधीः ॥ ६२ ॥
यत्र स्त्री यत्र कितवो बालो यत्र प्रशंसिता ।
राजन्निर्मूलतां याति तद्गृहं भार्गवोब्रवीत् ॥ ६३ ॥

Digitized by Google

तावत्स्यात्सुप्रसन्नास्यस्तावद्गुरुजने रतः ।
पुरुषो योषितां यावन्न शृणोति वचो रहः ॥ ६४ ॥
एताः स्वार्थपरा नार्यः केवलं स्वसुखे रताः ।
न तासां वल्लभः कोपि सुतोपि स्वसुखं विना ॥ ६५ ॥

कौलिक आह । तथापि प्रष्टव्या सा मया यतः पतिव्रता सा । अपरं तामपृष्ट्वाहं न किंचित्करोमि । एवं तमभिधाय सत्वरं गत्वा तामुवाच । प्रिये अद्यास्माकं कश्चिद्वचन्तरः सिद्धः । स वाञ्छितं प्रयच्छति । तदहं त्वां प्रष्टुमागतः । तत्कथय किं प्रार्थयामि । एष तावन्मम मित्रो नापितो वदत्येवं यद्राज्यं प्रार्थय । साह । आर्यपुत्र का मतिर्नापितानाम् । तन्न कार्यं तद्वचः । उक्तं च ।

चारणैर्वन्दिभिर्नीचैर्नापितैर्बालकैरपि ।
न मन्त्रं मतिमान्कुर्यात्सार्धं भिक्षुभिरेव च ॥ ६६ ॥

अपरं महती क्लेशपरंपरैषा राज्यस्थितिः संधिविग्रहयानासनसंश्रयद्वैधीभावादिभिः कदाचित्पुरुषस्य सुखं न प्रयच्छतीति । यतः ।

यदैव राज्ये क्रियतेभिलाषस्तदैव याति व्यसनेषु बुद्धिः ।
घटा नृपाणामभिषेककाले सहाम्भसैवापदमुद्गिरन्ति ॥ ६७ ॥

तथा च ।

रामप्रव्रजनं वने निवसनं पाण्डोः सुतानां वनं
वृष्णीनां निधनं नलस्य नृपते राज्यात्परिभ्रंशनम् ।
सौदासं तदवस्थमर्जुनवधं संचिन्त्य लङ्केश्वरं
दृष्ट्वा राज्यकृते विडम्बनगतं तस्मान्न तद्वाञ्छयेत् ॥ ६८ ॥

Digitized by Google

यदर्थं भ्रातरः पुत्रा अपि वाञ्छन्ति ये निजाः ।
वधं राज्यकृते राज्ञां तद्राज्यं दूरतस्त्यजेत् ॥ ६९ ॥

कौलिक आह । सत्यमुक्तं भवत्या । तत्कथय किं प्रार्थयामि । साह । त्वं तावदेकं पटं नित्यमेव निष्पादयसि । तेन सर्वो व्ययशुद्धिः संपद्यते । इदानीं त्वमात्मनोन्यद्बाहुयुगलं द्वितीयं शिरश्च प्रार्थय येन पटद्वयं संपादयसि पुरतः पृष्ठतश्च । एकस्य मूल्येन गृहे यथापूर्वं व्ययः शुद्ध्यति । द्वितीयस्य मूल्येन विशेषकृत्यानि क्रियन्ते । एवं सौख्येन स्वजातिमध्ये श्लाघ्यमानस्य कालो यास्यति । लोकद्वयस्योपार्जना भविष्यति । सोपि तदाकर्ण्य प्रहृष्टः प्राह । साधु पतिव्रते साधु । युक्तमुक्तं भवत्या । तदेवं करिष्यामि । एष मे निश्चयः । ततोसौ गत्वा व्यन्तरं प्रार्थयामास । भो यदि मयेप्सितं प्रयच्छसि तर्हेहि मे द्वितीयं बाहुयुगलं शिरश्च । एवमभिहिते तत्क्षणादेव द्विशिराश्चतुर्बाहुश्च संजातः । ततो हृष्टमना यावद्गृहमागच्छति तावल्लोकै राक्षसोयमिति मन्यमानैर्लकुटपाषाणप्रहारैस्ताडितो मृतश्च । अतोहं ब्रवीमि ।

यस्य नास्ति स्वयं प्रज्ञा मित्रोक्तं न करोति यः ।
स एव निधनं याति यथा मन्थरकौलिकः ॥ ७० ॥

चक्रधर आह । भोः सत्यमेतत् । सर्वोपि जनोश्रद्धेयामाशापिशाचिकां प्राप्य हास्यपदवीं याति । अथवा साध्विदमुच्यते केनापि ।

अनागतवतीं चिन्तामसंभाव्यां करोति यः ।
स एव पाण्डुरः शेते सोमशर्मपिता यथा ॥ ७१ ॥

सुवर्णसिद्धिराह । कथमेतत् । सोब्रवीत् ।

Digitized by Google

कथा ९.

कस्मिंश्चिन्नगरे कश्चित्स्वभावकृपणो नाम ब्राह्मणः प्रतिवसति स्म । तस्य भिक्षार्जितैः सक्तुभिर्भुक्तोर्वरितैर्घटः परिपूरितः । तं च घटं नागदन्तेवलम्ब्य तस्याधस्तात्खट्वां निधाय सततमेकदृष्ट्या तमवलोकयति । अथ कदाचिद्रात्रौ सुप्तश्चिन्तयामास । यत्परिपूर्णोयं घटस्तावत्सक्तुभिर्वर्तते । तद्यदि दुर्भिक्षं भवति तदनेन रूपकाणां शतमुत्पद्यते । ततस्तेन मयाजाद्वयं ग्रहीतव्यम् । ततः षण्मासिकप्रसववशात्ताभ्यां यूथं भविष्यति । ततोजाभिः प्रभूता गा ग्रहीष्यामि गोभिर्महिषीर्महिषीभिर्वडवाः । वडवाप्रसवतः प्रभूता अश्वा भविष्यन्ति । तेषां विक्रयात्प्रभूतं सुवर्णं भविष्यति । सुवर्णेन चतुःशालं गृहं संपद्यते । ततः कश्चिद्ब्राह्मणो मम गृहमागत्य प्राप्तवरां रूपाढ्यां कन्यां दास्यति । तत्सकाशात्पुत्रो मे भविष्यति । तस्याहं सोमशर्मेति नाम करिष्यामि । तत्तस्मिञ्जानुचलनयोग्ये संजातेहं पुस्तकं गृहीत्वाश्वशालायाः पृष्ठदेश उपविष्टस्तदवधारयिष्यामि । अत्रान्तरे सोमशर्मा मां दृष्ट्वा जनन्युत्सङ्गाज्जानुप्रचलनपरोश्वशुरासन्नवर्ती मत्समीपमागमिष्यति । ततोहं ब्राह्मणीं कोपाविष्टोभिधास्यामि । गृहाण तावद्बालकम् । सापि गृहकर्मव्यग्रतयास्मद्वचनं न श्रोष्यति । ततोहं समुत्थाय तां पादप्रहारेण ताडयिष्यामि । एवं तेन ध्यानस्थितेन तथैव पादप्रहारो दत्तो यथा स घटो भग्नः । सक्तुभिः पाण्डुरतां गतः । अतोहं ब्रवीमि ।

अनागतवतीं चिन्तामसंभाव्यां करोति यः ।

Digitized by Google

स एव पाण्डुरः शैते सोमशर्मेपिता यथा ॥ ७२ ॥

सुवर्णसिद्धिराह । एवमेतत् । कस्ते दोषो यतः सर्वोपि लोभेन विडम्बितो बाध्यते । उक्तं च ।

यो लौल्यात्कुरुते कर्म नैवोदर्कमवेक्षते ।

विडम्बनामवाप्नोति स यथा चन्द्रभूपतिः ॥ ७३ ॥

चक्रधर आह । कथमेतत् । स आह ।

कथा १०.

अस्ति कस्मिंश्चिन्नगरे चन्द्रो नाम भूपतिः प्रतिवसति स्म । तस्य पुत्रा वानरक्रीडारता वानरयूथं नित्यमेवानेकभोजनभक्षादिभिः पुष्टिं नयन्ति स्म । अथ वानरयूथाधिपो यः स औशनसबार्हस्पत्यचाणक्यमतवित्तदनुष्ठाता च तान्सर्वानप्यध्यापयति स्म । अथ तस्मिन्राजगृहे लघुकुमारवाहनयोग्यं मेषयूथमस्ति । तन्मध्यादेको जिह्वालौल्यादहर्निशं निःशङ्कं महानसे प्रविश्य यत्पश्यति तत्सर्वं भक्षयति । ते च सूपकारा यत्किंचित्काष्ठं मृन्मयं भाजनं कांस्यपात्रं ताम्रपात्रं वा पश्यन्ति तेनाशु ताडयन्ति । सोपि वानरयूथपस्तदृष्ट्वा व्यचिन्तयत् । अहो मेषसूपकारकलहोयं वानराणां क्षयाय भविष्यति यतोन्नस्वादलम्पटोयं मेषो महाकोपाश्च सूपकारा यथासन्नवस्तुना प्रहरन्ति । तद्यदि वस्तुनोभावात्कदाचिदुल्मुकेन ताडयिष्यन्ति तदूर्णाप्रचुरोयं मेषः स्वल्पेनापि वन्हिना प्रज्वलिष्यति । तद्दह्यमानः पुनरश्वकुट्यां समीपवर्तिन्यां प्रवेक्ष्यति । सापि तृणप्राचुर्याज्ज्वलिष्यति । ततोश्वा वन्हिदाघमवाप्स्य-

Digitized by Google

न्ति । शालिहोत्रेण पुनरेतदुक्तम् । यद्वानरवसयाश्वानां वन्हिदाघदोषः प्रशाम्यति । तन्नूनमेतेन भाव्यमत्र निश्चयः । एवं निश्चित्य सर्वान्वानरानाहूय रहसि प्रोवाच । यत्

मेषेण सूपकाराणां कलहो यत्र जायते ।
स भविष्यत्यसंदिग्धं वानराणां क्षयावहः ॥ ७४ ॥
तस्मात्स्यात्कलहो यत्र गृहे नित्यं विकारणः ।
तद्गृहं जीवितं वाञ्छन्दूरतः परिवर्जयेत् ॥ ७५ ॥

तथा च ।

कलहान्तानि हर्म्याणि कुवाक्यान्तं च सौहृदम् ।
कुराजान्तानि राष्ट्राणि कुकर्मान्तं यशो नृणाम् ॥ ७६ ॥

तन्न यावत्सर्वेषां संक्षयो भवति तावदेतद्राजगृहं संत्यज्य वनं गच्छामः । अथ तत्तस्य वचनमश्रद्धेयं श्रुत्वा मदोद्धता वानराः प्रहस्य प्रोचुः । भो भवतो वृद्धभावाद्बुद्धिवैकल्यं संजातं येनैतदुब्रवीषि । उक्तं च ।

वदनं दशनैर्हीनं लाला स्रवति नित्यशः ।
न मतिः स्फुरति क्वापि बाले वृद्धे विशेषतः ॥ ७७ ॥

न वयं स्वर्गसमानोपभोगान्नानाविधान्भक्ष्यविशेषान्राजपुत्रैः स्वहस्तदत्तानमृतकल्यान्परित्यज्य तत्राटव्यां कषायकटुतिक्तक्षारूक्षफलानि भक्षयिष्यामः । तच्छ्रुत्वाश्रुकलुषां दृष्टिं कृत्वा स प्रोवाच । रे रे मूर्खा यूयमेतस्य सुखस्य परिणामं न जानीथ । किं पाकरसास्वादनप्रायमेतत्सुखम् । परिणामे विषवद्भविष्यति । तदहं कुलक्षयं स्वयं नावलोकयिष्यामि । सांप्रतं वनं यास्यामि । उक्तं च ।

Digitized by Google

मित्रं व्यसनसंप्राप्तं स्वस्थानं परपीडितम् ।
धन्यास्ते ये न पश्यन्ति देशभङ्गं कुलक्षयम् ॥ ७८ ॥

एवमभिधाय सर्वांस्तान्परित्यज्य स यूथाधिपोटव्यां गतः । अथ तस्मिन्गतेन्यस्मिन्नहनि स मेषो महानसे प्रविष्टो यावत्सूपकारेण नान्यत्किंचित्समासादितं तावदर्धज्वलितकाष्ठेन ताड्यमानो ज्वाज्वल्यमानशरीरः शब्दायमानोश्वकुट्यां प्रत्यासन्नवर्तिन्यां प्रविष्टः । तत्र तृणप्राचुर्ययुक्तायां क्षितौ तस्य प्रलुठतः सर्वत्रापि वन्हिज्वालास्तथा समुत्थिता यथा केचिदश्वाः स्फुटितलोचनाः पञ्चत्वं गताः केचिद्बन्धनानि त्रोटयित्वार्धदग्धशरीरा इतश्चेतश्च हेषायमाणा धावमानाः सर्वमपि जनसमूहमाकुलीचक्रुः । अत्रान्तरे राजा सविषादः शालिहोत्रज्ञान्वैद्यानाहूय प्रोवाच । भोः प्रोच्यतामेषामश्वानां कश्चिद्दाहोपशमनोपायः । तेपि शास्त्राणि संचिन्त्य प्रोचुः । देव प्रोक्तमत्र विषये भगवता शालिहोत्रेण । यत्

कपीनां मेदसा दोषो वन्हिदाहसमुद्भवः ।
अश्वानां नाशमभ्येति तमः सूर्योदये यथा ॥ ७९ ॥

तत्क्रियतामेतच्चिकित्सितं द्राग्यावन्नैतेन दाहदोषेण विनश्यन्ति । सोपि तदाकर्ण्य समस्तवानरवधमादिष्टवान् । किं बहुना । सर्वेपि ते वानरा विविधायुधलकुटपाषाणादिभिर्व्यापादिता इति । अथ सोपि वानरयूथपस्तं पुत्रपौत्रभ्रातृसुतभागिनेयादिसंक्षयं ज्ञात्वा परं विषादमुपागतः । स त्यक्ताहारक्रियो वनादूनं पर्यटति । अचिन्तयच्च । कथमहं तस्य नृपापसदस्यानृणताकृत्येनापकृत्यं करिष्यामि । उक्तं च ।

Digitized by Google

मर्षयेद्दूषणं यत्र वंशजां परनिर्मिताम् ।
भयाद्वा यदि वा कामात्स ज्ञेयः पुरुषाधमः ॥ ८० ॥

अथ तेन वृद्धवानरेण कुत्रचित्पिपासाकुलेन भ्रमता पद्मिनीखण्डमण्डितं सरः समासादितम् । तद्यावत्सूक्ष्मेक्षिकयावलोकयति तावद्बनचरमनुष्याणां पदपङ्क्तिप्रवेशोस्ति न निष्क्रमणम् । ततश्चिन्तितम् । नूनमत्र जलान्ते दुष्टग्राहेण भाव्यम् । तत्पद्मिनीनालमादाय दूरस्थोपि जलं पिबामि । तथानुष्ठिते तन्मध्याद्राक्षसो निष्क्रम्य रत्नमालाविभूषितकण्ठस्तमुवाच । भो अत्र यः सलिले प्रवेशं करोति स मे भक्ष्य इति । तन्नास्ति धूर्ततरस्त्वत्समोन्यो यत्पानीयमनेन विधिना पिबसि । ततस्तुष्टोहम् । प्रार्थय हृदयवाञ्छितम् । कपिराह । भोः कियती ते भक्षणशक्तिः । स आह । शतसहस्रायुतलक्षाण्यपि जलप्रविष्टानि भक्षयामि । बाह्यतः शृगालोपि मां दूषयति । वानर आह । अस्ति मे भूपतिना सहात्यन्तं वैरम् । यद्येनां रत्नमालां मे प्रयच्छसि तत्सपरिवारमपि तं भूपतिं वाक्प्रपञ्चेन लोभयित्वात्र सरसि यथा प्रविशति तथा करोमि । सोपि श्रद्धेयं वचस्तस्य श्रुत्वा रत्नमालां दत्त्वा प्राह । भो मित्र यत्समुचितं भवति तत्कर्तव्यमिति । वानरोपि रत्नमालाविभूषितकण्ठो वृक्षप्रासादेषु परिभ्रमज्जनैर्दृष्टः पृष्टश्च । भो यूथप भवानियन्तं कालं कुत्र स्थितः । भवतेदृग्रत्नमाला कुत्र लब्धा या दीप्ता सूर्यमपि तिरस्करोति । वानरः प्राह । अस्ति कुत्रचिदरण्ये गुप्ततरं महत्सरो धनदनिर्मितम् । तत्र सूर्येणोदिते रविवारे यः कश्चिन्निमज्जति स धनदप्रसादादीदृग्रत्नमालाविभूषितकण्ठो निःसरति । अथ भूभुजा तदाकर्ण्य स

Digitized by Google

वानरः समाहूतः पृष्टश्च । भो यूथाधिप किं सत्यमेतत् । रत्नमालासनाथं सरोस्ति क्वापि । कपिराह । स्वामिन् एष प्रत्यक्षतया मत्कण्ठस्थितया रत्नमालया प्रत्ययस्ते । तद्यदि रत्नमालाप्रयोजनं तन्मया सह कमपि प्रेषय येन दर्शयामि । तच्छ्रुत्वा नृपतिराह । यद्येवं तदहं सपरिजनः स्वयमेष्यामि येन प्रभूता रत्नमालाः संपद्यन्ते । वानर आह । स्वामिन् एवं क्रियताम् । तथानुष्ठिते भूपतिना सह रत्नमालालोभेन सर्वे कलत्रभृत्याः प्रस्थिताः । वानरोपि राज्ञा दोलाधिरूढेन स्वोत्सङ्ग आरोपितः सुखेन प्रीतिपूर्वमानीयते । अथवा साध्विदमुच्यते ।

तृष्णे देवि नमस्तुभ्यं यया वित्तान्विता अपि ।
अकृत्येषु नियोज्यन्ते भ्राम्यन्ते दुर्गमेष्वपि ॥ ८१ ॥

तथा च ।

इच्छति शती सहस्रं सहस्री लक्षमीहते ।
लक्षाधिपस्तथा राज्यं राज्यस्थः स्वर्गमीहते ॥ ८२ ॥

जीर्यन्ते जीर्यतः केशा दन्ता जीर्यन्ति जीर्यतः ।
जीर्यतश्चक्षुषी श्रोत्रे तृष्णैका तरुणायते ॥ ८३ ॥

अथ तत्सरः समासाद्य वानरः प्रत्यूषसमये राजानमुवाच । देव अत्रार्धोदिते सूर्येत्र प्रविष्टानां सिद्धिर्भवति । तत्सर्वोपि जन एकदैव प्रविशतु । त्वया पुनर्मया सह प्रवेष्टव्यं येन पूर्वदृष्टस्थानमासाद्य प्रभूतास्ते रत्नमाला दर्शयामि । अथ प्रविष्टास्ते लोकाः सर्वे भक्षिता राक्षसेन । अथ तेषु चिरायमाणेषु राजा वानरमाह । भो यूथाधिप किमिति चिरायते मे जनः । तच्छ्रुत्वा

Digitized by Google

वानरः सत्वरं वृक्षमारुह्य राजानमुवाच । भो दुष्टनरपते राक्षसेनान्तःसलिलस्य स्थितेन भक्षितस्ते परिजनः । साधितं मया कुलक्षयजं वैरम् । तद्गम्यताम् । त्वं स्वामीति मत्वा नात्र प्रवेशितः । उक्तं च ।

कृते प्रतिकृतिं कुर्याद्धिंसिते प्रतिहिंसितम् ।
न तत्र दोषं पश्यामि दुष्टे दुष्टं समाचरेत् ॥ ८४ ॥

तत्त्वया मम कुलक्षयः कृतो मया पुनस्तवेति । अथैतदाकर्ण्य राजा शोकाविष्टः पदातिरेकाकी यथायातमार्गेण निष्क्रान्तः । अथ तस्मिन्भूपतौ गते राक्षसस्तृप्तो जलान्निष्क्रम्य सानन्दमिदमाह ।

हतः शत्रुः कृतं मित्रं रत्नमाला न हारिता ।
नालेनास्वादितं तोयं साधु भो वटवानर ॥ ८५ ॥

अतोहं ब्रवीमि ।

यो लौल्यात्कुरुते कर्म नैवोदर्कमवेक्षते ।
विडम्बनामवाप्नोति स यथा चन्द्रभूपतिः ॥ ८६ ॥

एवमुक्त्वा भूयोपि स चक्रधरमाह । भो मित्र प्रेषय मां येन स्वगृहं गच्छामि । चक्रधर आह । भद्र आपदर्थे धनमित्रसंग्रहः क्रियते । तन्मामेवंविधं त्यक्त्वा क्व यास्यसि । उक्तं च ।

यस्त्यक्त्वा सापदं मित्रं याति निष्ठुरतां सुहृत् ।
कृतघ्नस्तेन पापेन नरके यात्यसंशयम् ॥ ८७ ॥

सुवर्णसिद्धिराह । भोः सत्यमेतद्यदि गम्यस्थाने शक्तिर्भवति । एतत्पुनर्मनुष्याणामगम्यस्थानम् । नास्ति कस्यापि त्वामुन्मोचयितुं शक्तिः । अपरं यथा यथा चक्रभ्रमवेदनया तव

Digitized by Google

मुखविकारं पश्यामि तथा तथाहमेतज्जानामि यद्वाग्गच्छामि मा कश्चिन्ममाप्यनर्थो भवति । यतः ।

यादृशी वदनच्छाया दृश्यते तव वानर ।
विकालेन गृहीतोसि यः परैति स जीवति ॥ ८८ ॥

चक्रधर आह । कथमेतत् । सोब्रवीत् ।

कथा ११.

कस्मिंश्चिन्नगरे भद्रसेनो नाम राजा प्रतिवसति स्म । तस्य सर्वलक्षणसंपन्ना रत्नवती नाम कन्यास्ति । तां कश्चिद्राक्षसो जिहीर्षति । रात्रावागत्योपभुङ्क्ते । परं कृतरक्षोपधानां हर्तुं न शक्नोति । सापि तत्समये रक्षःसांनिध्यजामवस्थामनुभवति कम्पादिभिः । एवमतिक्रामति काले कदाचित्स राक्षसो मध्यनिशायां गृहकोणे स्थितः । सापि राजकन्या स्वसखीमुवाच । सखि पश्यैष विकालसमये नित्यमेव मां कदर्थयति । अस्ति तत्तस्य दुरात्मनः प्रतिषेधोपायः कश्चित् । तच्छ्रुत्वा राक्षसोपि व्यचिन्तयत् । नूनं यथाहं तथान्योपि कश्चिद्विकालनामास्या हरणाय नित्यमेवागच्छति । परं सोप्येनां हर्तुं न शक्नोति । तत्तावदश्वरूपं कृत्वाश्वमध्यगतो निरीक्षयामि किंरूपः स किंप्रभाव इति । एवं राक्षसोश्वरूपं कृत्वाश्वानां मध्ये तिष्ठति । तथानुष्ठिते निशीथसमये राजगृहे कश्चिदश्वचौरः प्रविष्टः । स च सर्वानश्वानवलोक्य तं राक्षसमश्वतमं विज्ञायाधिरूढः । अत्रान्तरे राक्षसश्चिन्तयामास । नूनमेष विकालनामा मां चौरं मत्वा कोपान्नि-

Digitized by Google

हन्तुमागतः। तत्किं करोमि। एवं चिन्तयन्सोपि तेन खलीनां मुखे निधाय कशाघातेन ताडितः। अथासौ भयत्रस्तमनाः प्रधावितुमारब्धः। चौरोपि दूरं गत्वा खलीनाकर्षणेन तं स्थिरं कर्तुमारब्धवान्। स तु केवलं वेगाद्वेगतरं गच्छति। अथ तं तथागणितखलीनाकर्षणं मत्वा चौरश्चिन्तयामास। अहो नैवंविधा वाजिनो भवन्ति नैवमगणितखलीनाः। तन्नूनमनेनाश्वरूपेण राक्षसेन भवितव्यम्। तद्यदि कंचित्कांशुलं भूमिदेशमवलोकयामि तदात्मानं तत्र पातयामि। नान्यथा मे जीवितव्यमस्ति। एवं चिन्तयत इष्टदेवतां स्मरतस्तस्य सोश्वो वटवृक्षस्य तले निष्क्रान्तः। चौरोपि वटप्ररोहमासाद्य तत्रैव विलग्नः। ततो द्वावपि तौ पृथग्भूतौ परमानन्दभाजौ जीवितविषये लब्धप्रत्याशौ संपन्नौ। अथ तत्र वटे कश्चिद्राक्षससुहृद्वानरः स्थित आसीत्। तेन राक्षसं त्रस्तमालोक्य व्याहृतम्। भो मित्र किमेवं पलाय्यतेलीकभयेन। त्वद्भक्ष्योयं मानुषः। भक्ष्यताम्। सोपि वानरवचो निशम्य स्वरूपमाधाय शङ्कितमनाः स्खलितगतिर्निवृत्तः। चौरोपि तं वानराहूतं ज्ञात्वा कोपात्तस्य लाङ्गूलं लम्बमानं मुखे निधाय चर्वितवान्। वानरोपि तं राक्षसाभ्यधिकं मन्यमानो भयान्न किंचिदुक्तवान्केवलं व्यथार्त्तो निमीलितनयनस्तिष्ठति यथा भवानिति। राक्षसोपि तं तथाभूतमवलोक्य श्लोकमेनमपठत्।

यादृशी वदनच्छाया दृश्यते तव वानर।
विकलेन गृहीतोसि यः परैति स जीवति॥ ८९॥

प्रनष्टश्च।

तत्प्रेषय मां येन गृहं गच्छामि। त्वं पुनरनुभुङ्क्ष्व

एव लोभवृक्षफलम् । चक्रधरः प्राह । भो अकारणमेतत् । दैववशात्संपद्यते नृणां शुभाशुभम् । उक्तं च ।

दुर्गं त्रिकूटः परिखा समुद्रो रक्षांसि योधा धनदाश्च वित्तम् ।
शास्त्रं च यस्योशनसा प्रणीतं स रावणोदैववशाद्विपन्नः ॥ ९० ॥

तथा च ।

अन्धकः कुब्जकश्चैव त्रिस्तनी राजकन्यका ।
त्रयोप्यन्यायतः सिद्धाः संमुखे कर्मणि स्थिते ॥ ९१ ॥

सुवर्णसिद्धिराह । कथमेतत् । सोब्रवीत् ।

कथा १२.

अस्त्यत्र धरातल उत्तरपथे मधुपुरं नाम नगरम् । तत्र मधुसेनो नाम राजा बभूव । तस्य कदाचिद्विषयसुखमनुभवतस्त्रिस्तनी कन्या बभूव । अथ तां त्रिस्तनीं जातां श्रुत्वा स राजा कञ्चुकिनः प्रोवाच । यद्येोस्त्यज्यतामियं त्रिस्तनी गत्वा दूरेरण्ये यथा कश्चिन्न जानाति । तच्छ्रुत्वा कञ्चुकिनः प्रोचुः । महाराज ज्ञायते यदनिष्टकारिणी त्रिस्तनी कन्या भवति । तथापि ब्राह्मण आहूय प्रष्टव्या येन लोकद्वयं न विरुध्यते । यतः ।

यः सततं परिपृच्छति शृणोति संधारयत्यनिशम् ।
तस्य दिवाकरकिरणैर्नलिनीव विवर्धते बुद्धिः ॥ ९२ ॥

तथा च ।

पृच्छकेन सदा भाव्यं पुरुषेण विजानता ।
राक्षसेन्द्रगृहीतोपि प्रश्नान्मुक्तो द्विजः पुरा ॥ ९३ ॥

राजाह । कथमेतत् । ते प्रोचुः ।

Digitized by Google

कथा १३.

देव कस्मिंश्चिद्दुर्नोद्देशे चण्डकर्मा नाम राक्षसः प्रतिवसति स्म । एकदा तेन भ्रमताटव्यां कश्चिद्ब्राह्मणः समासादितः । तत-
5 स्तस्य स्कन्धमारुह्य प्रोवाच । भो अग्रे सरो गम्यताम् । ब्राह्मणोपि भयत्रस्तमनास्तमादाय प्रस्थितः । अथ तस्य कमलोदरकोमलौ पादौ दृष्ट्वा ब्राह्मणो राक्षसमपृच्छत् । भोः किमेवंविधौ ते पादावतिकोमलौ । राक्षस आह । भो व्रतमस्ति । नाहमार्द्रपादो भूमिं स्पृशामि । ततस्तच्छ्रुत्वात्मनो मोक्षोपायं चिन्तयंस्तत्सरः प्राप्तः ।
10 ततो राक्षसेनाभिहितम् । भो यावदहं स्नानं कृत्वा देवतार्चनविधिं विधायागच्छामि तावत्त्वयातः स्थानान्नान्यत्र गन्तव्यम् । तथानुष्ठिते द्विजश्चिन्तयामास । नूनं देवतार्चनविधेरूर्ध्वं मामेष भक्षयिष्यति । तद्द्रुततरं गच्छामि येनैष आर्द्रपादो न मम पृष्ठमेष्यति । तथानुष्ठिते राक्षसो व्रतभङ्गभयात्तस्य पृष्ठं न गतः । अतोहं ब्रवीमि ।

15 पृच्छकेन सदा भाव्यं पुरुषेण विजानता ।
राक्षसेन्द्रगृहीतोपि प्रश्नान्मुक्तो द्विजः पुरा ॥ ९४ ॥

अथ तेभ्यस्तच्छ्रुत्वा राजा द्विजानाहूय प्रोवाच । भो ब्राह्मणाः त्रिस्तनी मे कन्या संपन्ना । तत्किं तस्याः प्रतिविधानमस्ति किं वा न । ते प्रोचुः । देव श्रूयताम् ।

20 हीनाङ्गी वाधिकाङ्गी वा या भवेत्कन्यका नृणाम् ।
भर्तुः स्यात्सा विनाशाय स्वशीलनिधनाय च ॥ ९५ ॥
या पुनस्त्रिस्तनोपेता याति लोचनगोचरम् ।
पितरं नाशयत्येव सा द्रुतं नात्र संशयः ॥ ९६ ॥

Digitized by Google

तस्मादस्या दर्शनं परिहरतु देवः। तथा यदि कश्चिदुद्वाहयति तदेनां तस्मै दत्त्वा देशत्यागेन नियोजयितव्य इति। एवं कृते लोकद्वयाविरुद्धता भवति। अथ तेषां तद्वचनमाकर्ण्य स राजा पटहशब्देन सर्वत्र घोषणामाज्ञापयामास। अहो त्रिस्तनीं राजकन्यां यः कश्चिदुद्वाहयति स सुवर्णलक्षमाप्नोति देशत्यागं च। एवं तस्यामाघोषणायां क्रियमाणायां महान्कालो व्यतीतः। न कश्चित्तां प्रतिगृण्हाति। सापि यौवनोन्मुखी संजाता सुगुप्तस्थानस्थिता यत्नेन रक्ष्यमाणा तिष्ठति। अथ तत्रैव नगरे कश्चिदन्धस्तिष्ठति। तस्य च मन्थरकनामा कुब्जोग्रेसरो यष्टिग्राही। ताभ्यां तं पटहशब्दमाकर्ण्य मिथो मन्त्रितम्। स्पृश्यतेयं पटहो यदि कथमपि दैवात्कन्या लभ्यते तथा सुवर्णप्राप्तिश्च भवति सुखेन सुवर्णप्राप्त्या कालो व्रजति। अथ यदि तस्या दोषतो मृत्युर्भवति दारिद्र्योपात्तस्यास्य क्लेशस्य पर्यन्तो भवति। उक्तं च।

लज्जा स्नेहः स्वरविशदता बुद्धयः सौमनस्यं
प्राणोनङ्गः पठनसमता दुःखहानिर्विलासाः।
धर्मः शास्त्रं सुरगुरुमतिः शौचमाचारचिन्ता
सस्यैः पूर्णे जठरपिठरे प्राणिनां संभवन्ति ॥ ९७ ॥

एवमुक्त्वान्धेन गत्वा स पटहः स्पृष्टः। भो अहं तां कन्यामुद्वाहयामि यदि राजा मे प्रयच्छति। ततस्तै राजपुरुषैर्गत्वा राज्ञे निवेदितम्। देव अन्धकेन केनचित्पटहः स्पृष्टः। तदत्र विषये देवः प्रमाणं किं क्रियतामिति। राजा प्राह।

अन्धो वा बधिरो वापि कुष्ठी वाप्यन्त्यजोपि वा।
प्रतिगृण्हातु तां कन्यां सलक्षां स्याद्विदेशगः ॥ ९८ ॥

Digitized by Google

अथ राजादेशात्तै रक्षापुरुषैस्तं नदीतीरे नीत्वा सुवर्णलक्षेण समं विवाहविधिना त्रिस्तनीं तस्मै दत्त्वा जलयाने निधाय कैवर्ताः प्रोक्ताः । भो देशान्तरं नीत्वा कस्मिंश्चिदधिष्ठानेन्धः सपत्नीकः कुब्जकेन सह मोचनीयः । तथानुष्ठिते विदेशमासाद्य कस्मिंश्चिदधिष्ठाने कैवर्तदर्शिते ते त्रयोपि मूल्येन गृहं प्राप्ताः सुखेन कालं नयन्ति स्म । केवलमन्धः पर्यङ्के सुप्तस्तिष्ठति । गृहव्यापारं मन्थरकः करोति । एवं गच्छता कालेन त्रिस्तन्याः कुब्जकेन सह विकृतिः समपद्यत । अथवा साध्विदमुच्यते ।

यदि स्याच्छीतलो वन्हिश्चन्द्रमा दहनात्मकः ।
सुस्वादः सागरः स्त्रीणां तत्सतीत्वं प्रजायते ॥ ९९ ॥

अथान्येद्युस्त्रिस्तन्या मन्थरकोभिहितः । भोः सुभग यद्येषोन्धः कथंचिद्यापाद्यते तदावयोः सुखेन कालो याति । तदन्विष्यतां कुत्रचिद्विषं येनास्मै तत्प्रदाय सुखिनी भवामि । अन्यदा कुब्जकेन परिभ्रमता मृतः कृष्णसर्पः प्राप्तः । तं गृहीत्वा प्रहृष्टमना गृहमभ्येत्य तामाह । सुभगे लब्धोयं कृष्णसर्पः । तदेनं खण्डशः कृत्वा प्रभूतशुण्ठ्यादिभिः संस्कार्यामुष्मै विकलनेत्राय मत्स्यामिषं भणित्वा प्रयच्छ येन द्राग्विनश्यति यतोस्य मत्स्यस्यामिषं सदा प्रियम् । एवमुक्त्वा मन्थरको बाह्ये गतः । सापि प्रदीप्तं वन्हौ कृष्णसर्पं खण्डशः कृत्वा तक्रमादाय गृहव्यापाराकुला तं विकलाक्षं सप्रश्रयमुवाच । आर्यपुत्र तवाभीष्टं मत्स्यमांसं समानीतं यतस्त्वं सदैव तत्पृच्छसि । ते च मत्स्या वन्हौ पाचनाय तिष्ठन्ति । तद्यावदहं गृहकृत्यं करोमि तावत्त्वं दर्वीमादाय क्षणमेकं तान्प्रचालय । सोपि तदाकर्ण्य हृष्टमनाः सृक्किणी परिलिहन्द्रुतमुत्थाय

Digitized by Google

दर्वीमादाय प्रमथितुमारब्धः । अथ तस्य मत्स्यान्मथतो विषगर्भवाष्पेण संस्पृष्टं नीलपटलं चक्षुर्भ्यामगलत् । असावप्यन्धो बहुगुणं मन्यमानो विशेषान्नेत्राभ्यां वाष्पग्रहणमकरोत् । ततो लब्धदृष्टिर्जातो यावत्पश्यति तावत्सक्रमध्ये कृष्णसर्पखण्डानि केवलान्येवावलोकयति । ततो व्यचिन्तयत् । अहो किमेतत् । मम मत्स्यामिषं कथितमासीदनया । एतानि तु कृष्णसर्पखण्डानि । तत्तावद्विज्ञानामि सम्यक्त्रिस्तन्याश्चेष्टितं किं मम वधोपायक्रमः कुब्जस्य वोताहो अन्यस्य वा कस्यचित् । एवं विचिन्त्य स्वाकारं गूहन्नन्धवत्कर्म करोति यथा पुरा । अत्रान्तरे कुब्जः समागत्य निःशङ्कतयालिङ्गनचुम्बनादिभिस्त्रिस्तनीं सेवितुमुपचक्रमे । सोप्यन्धस्तमवलोकयन्नपि यावन्न किंचिच्छस्त्रं पश्यति तावत्कोपव्याकुलमनाः पूर्ववच्छयनं गत्वा कुब्जं चरणाभ्यां संगृह्य सामर्थ्यात्स्वमस्तकोपरि भ्रामयित्वा त्रिस्तनीं हृदये व्यताडयत् । अथ कुब्जप्रहारेण तस्यास्तृतीयः स्तन उरसि प्रविष्टः । तथा बलान्मस्तकोपरि भ्रामणेन कुब्जः प्राञ्जलतां गतः । अतोहं ब्रवीमि ।

अन्धकः कुब्जकश्चैव त्रिस्तनी राजकन्यका ।
त्रयोप्यन्यायतः सिद्धाः संमुखे कर्मणि स्थिते ॥ १०० ॥

सुवर्णसिद्धिराह । भोः सत्यमेतत् । दैवानुकूलतया सर्वं कल्याणं संपद्यते । तथापि पुरुषेण सतां वचनं कार्यम् । न पुनरेवमेव यो वर्तते स त्वमिव विनश्यति । तथा च ।

एकोदराः पृथग्ग्रीवा अन्योन्यफलभक्षिणः ।
असंहता विनश्यन्ति भारण्डा इव पक्षिणः ॥ १०१ ॥

चक्रधर आह । कथमेतत् । सोब्रवीत् ।

Digitized by Google

कथा १४.

कस्मिंश्चित्सरोवरे भारण्डनामा पक्ष्येकोदरः पृथग्ग्रीवः प्रतिवसति स्म । तेन च समुद्रतीरे परिभ्रमता किंचित्फलममृतकल्पं तरंगाक्षिप्तं संप्राप्तम् । सोपि भक्षयन्निदमाह । अहो बहूनि मयामृतप्रायाणि समुद्रकल्लोलाहतानि फलानि भक्षितानि । परमपूर्वोस्यास्वादः । तत्किं पारिजातहरिचन्दनतरुसंभवं किं वा किंचिदमृतमयफलमव्यक्तेनापि विधिना पतितम् । एवं तस्य ब्रुवतो द्वितीयमुखेनाभिहितम् । भो यद्येवं तन्ममापि स्तोकं प्रयच्छ येन जिव्हासौख्यमनुभवामि । ततो विहस्य प्रथमवक्त्रेणाभिहितम् । आवयोस्तावदेकमुदरमेका तृप्तिश्च भवति । ततः किं पृथग्भक्षितेन । वरमनेन शेषेण प्रिया तोष्यते । एवमभिधाय तेन शेषं भारण्ड्याः प्रदत्तम् । सापि तदास्वाद्य प्रहृष्टतमालिङ्गनचुम्बनसंभावनानेकचाटुपरा बभूव । द्वितीयं मुखं तद्दिनादेव प्रभृति सोद्वेगं सविषादं च तिष्ठति । अथान्येद्युर्द्वितीयमुखेन विषफलं प्राप्तम् । तद्दृष्ट्वापरमाह । भो निस्त्रिंश पुरुषाधम निरपेक्ष मया विषफलमासादितम् । तत्त्वापमानाद्भक्षयामि । अपरेणाभिहितम् । मूर्ख मा मैवं कुरु । एवं कृते द्वयोरपि विनाशो भविष्यति । अथैवं वदता तेनापमानेन फलं भक्षितम् । किं बहुना । द्वावपि विनष्टौ । अतोहं ब्रवीमि ।

एकोदराः पृथग्ग्रीवा अन्योन्यफलभक्षिणः ।
असंहता विनश्यन्ति भारण्डा इव पक्षिणः ॥ १०२ ॥

Digitized by Google

चक्रधर आह । सत्यमेतत् । तद्गच्छ गृहम् । परमेकाकिना न गन्तव्यम् । उक्तं च ।

एकः स्वादु न भुञ्जीत नैकः सुप्तेषु जागृयात् ।
एको न गच्छेदध्वानं नैकश्चार्थान्प्रचिन्तयेत् ॥ १०३ ॥

अपि च ।

अपि कापुरुषो मार्गे द्वितीयः क्षेमकारकः ।
कर्कटेन द्वितीयेन जीवितं परिरक्षितम् ॥ १०४ ॥

सुवर्णसिद्धिराह । कथमेतत् । सोब्रवीत् ।

कथा १६.

कस्मिंश्चिदधिष्ठाने ब्रह्मदत्तनामा ब्राह्मणः प्रतिवसति स्म । स च प्रयोजनवशाद्ग्रामे प्रस्थितः स्वमात्राभिहितः । यद्वत्स कथमेकाकी व्रजसि । तदन्विष्यतां कश्चिद्द्वितीयः सहायः । स आह । अम्ब मा भैषीः । निरुपद्रवोयं मार्गः । कार्यवशादेकाकी गमिष्यामि । अथ तस्य तं निश्चयं ज्ञात्वा समीपस्थवाप्याः सकाशात्कर्कटमादाय मात्राभिहितः । वत्स अवश्यं यदि गन्तव्यं तदेष कर्कटोपि सहायः । तदेनं गृहीत्वा गच्छ । सोपि मातुर्वचनादुभाभ्यां पाणिभ्यां तं संगृह्य कर्पूरपुटिकामध्ये निधाय पात्रमध्ये संक्षिप्य शीघ्रं प्रस्थितः । अथ गच्छन्ग्रीष्मोष्मणा संतप्तः कंचिन्मार्गस्थं वृक्षमासाद्य तत्रैव प्रसुप्तः । अत्रान्तरे वृक्षकोटरान्निर्गत्य सर्पस्तत्समीपमागतः । सोपि कर्पूरसुगन्धसहजप्रियत्वात्तं परित्यज्य वस्त्रं विदार्याभ्यन्तरगतां कर्पूरपुटिकामतिलौल्यादभक्षयत् । सोपि कर्कटस्तत्रैव स्थितः सन्सर्पप्राणानपाहरत् । ब्राह्मणोपि यावत्प्रबुद्धः पश्यति तावत्समीपे

Digitized by Google

कृष्णसर्पो निजपार्श्वे कर्पूरपुटिकोपरि स्थितस्तिष्ठति । तं दृष्ट्वा व्यचिन्तयत् । कर्कटेनायं हत इति प्रसन्नो भूत्वाब्रवीत् । भोः सत्यमभिहितं मम मात्रा यत्पुरुषेण कोपि सहायः कार्यो नैकाकिना गन्तव्यम् । ततो मया श्रद्धापूरितचेतसा तद्वचनमनुष्ठितम् । तेनाहं कर्कटेन सर्पव्यापादनाद्रक्षितः । अथवा साध्विदमुच्यते ।

मन्त्रे तीर्थे द्विजे देवे दैवज्ञे भेषजे गुरौ ।
यादृशी भावना यस्य सिद्धिर्भवति तादृशी ॥ १०५ ॥

एवमुक्त्वासौ ब्राह्मणो यथाभिप्रेतं गतः । अतोहं ब्रवीमि ।

अपि कापुरुषो मार्गे द्वितीयः क्षेमकारकः ।
कर्कटेन द्वितीयेन जीवितं परिरक्षितम् ॥ १०६ ॥

ततश्च सुवर्णसिद्धिरपि तं चक्रधरं ब्राह्मणो यथानुज्ञाप्य स्वगृहं गतः ॥

समाप्तं चेदमपरीक्षितकारकं नाम पञ्चमं तन्त्रम् ॥

॥ एवं पञ्चतन्त्रकं नाम नीतिशास्त्रं समाप्तम् ॥

Digitized by Google

NOTES TO PANCHATANTRA IV. & V.

P. 1. L. 1.—लब्धप्रणाशम् compare अभिज्ञानशाकुन्तलं नाम नाटकम् ॥ and the titles of the other Tantras.

P. 1. L. 3.—बुद्धि 'presence of mind.'

P. 1. L. 13.—The Vais'vadeva is the sacrifice which ought to be offered before the morning and evening meals with the freshly prepared food. It includes oblations to various deities and ends with one offered to the vis've devâh all the gods. See Manu III. 84, sqq. and 121. स्वर्गसंक्रम: bahuvríhi-compound.

P. 1 L. 14.—चरण 'a Vedic school,' such as that of the A'pastambas. विद्या the knowledge (of the Vedas and Vedángas), 'sacred learning.' The Bráhmanas, Sútras and Smritis use this word almost exclusively in this restricted sense.

P. 1. L. 20.—विविधशास्त्रगोष्ठी 'conversations regarding various sciences.'

P. 2. L. 11.—एकस्थाने, firstly, अन्यस्मिन्, secondly. प्रसूते 'produces offspring,' *i. e.* 'is the source of the ties of relationship.'

P. 2. L. 17.—हुतवहज्वालासमम्, (sighest sighs) 'burning hot like flames of fire.'

P. 2. L. 18.—यत् 'because' must be taken also with each of the preceding sentences.

Digitized by Google

P. 2. L. 22.—Sense of s'loka 7: 'Be kind again, because I show contrition and really nobody loves thee so well as I."

P. 3. L. 2.—Metre of s'loka 8: Vasantatilaká.

P. 3. L. 3.—कृत्रिमभावरम्या 'charming on account of her feigned affection.'

P. 3. L. 9.—कृतं विद्धि 'know that I shall certainly kill myself.' The part. perf. pass. indicates the firm resolution, which is so firm, that the act may be considered as good as done.

P. 3. L. 11.—वज्रलेप (lit. 'hard ointment') is the name of 'a kind of very adhesive mortar.' It contains besides lime and sand, for which latter salt or even pearl powder is said to be substituted, oil and cotton, and is used particularly to fasten statues of gods in their places.

P. 4. L. 3.—चतुष्क 'a square.' Probably the चौक or four-cornered figures are meant here which are drawn in white chalk, or formed of wheat or rice, round the seat or dining-place of honoured guests at festive occasions. See Molesworth Maráthí Dict. s. v. चौक. This explanation, which I owe to Mr. Shankar P. Pandit, seems better than that, proposed in the Petersburg Dict. s. v. चतुष्क viz. 'a hall resting on four pillars or a Mandapa.' For it is, at least now, not customary to erect Mandapas simply for the reception of guests. प्रगुणित 'splendid.'

P. 4. L. 6.— कौलिकाकार 'behaving like a weaver,' because the weaver constantly draws towards himself the batten and the threads of the weft.

P. 4. L. 11.—जलान्ते 'in the water.' Compare below समुद्रान्ते and similar compounds, passim, and Raghu II. 19 and 58.

P. 4. L. 14.—पुलिनप्रदेश 'a sandbank.'

Digitized by Google

P. 5. L. 8.—जल्पित 'promised, vowed.'

P. 5. L. 14.—चिन्तयान irreg. pres. part. A'tm. see Benfey gr. § 170. M. Müller gr. § 419. This and similar forms are very common in the Mahábhárata and Rámáyaṇa.

P. 5. L. 21.—गर्भमश्वतरी यथा construe यथाश्वतरी मृत्युमुपगृह्णाति गर्भरूपम्.

P. 6. L. 3.—ते. According to the common rules of grammar it ought to be तव, as ते and the other enclitic forms of the pronouns cannot stand in the beginning of a sentence. Siddhántakaumudí I. p. 175, sqq.

P. 6. L. 6.—Metre of s'loka 15: Upajáti.

P. 6. L. 9.—गङ्गादत्तः stands for गङ्गादत्तः. For in compounds which are used as proper names, the final आ or ई of a feminine affix which ends the first part of the comp., may be shortened. Siddhántakaumudí. I. p. 468.

P. 6. L. 11.—अस्ति (Thus) it is,' must be taken as separate sentence and as the immediate answers to the question कथमेतत्. Professor Benfey combines it with कस्मिंश्चित् and takes it in the sense of ,' which so ever it may be.' For other examples of this use of अस्ति compare p. 12. l. 2, p. 19. l. 9, p. 39. l. 16, p. 41. l. 18, p. 44. l. 5, p. 69. l. 10, and the Petersburg Dict. s. v. अस्.

P. 6. L. 14.—दायादैः 'kinsmen.' दायमादत्त इति दायादः lit: 'heir' is used also to denote all the relations of a person, who are otherwise called Sagotra-sapiṇḍas *i. e.* descendants, ascendants and collaterals in the male lines within seven degrees, probably, because, under the old law, these persons alone inherited. Compare also Yájñavalkya II. 263 with the remarks of Vijñánes'vara on the passage.

P. 6 .L. 17.—Metre of s'loka 16: A'ryá.

Digitized by Google

P. 7. L. 5.—एष 'There (is) somebody (who).'

P. 7. L. 10.—Brihaspati is the reputed author of a work on law and of one on Níti. The latter treated of 'Distrust,' अविश्वास.

P. 7. L. 12.—भक्षणार्थं 'in order to give me (to his enemy) to eat *i. e.* in order to poison his enemy by giving him my body to eat.' See below Tantra V. p. 80, sqq., where the attempt of the 'princess with the three breasts,' to poison her husband with the meat of a 'black cobra' is narrated.

P. 9. L. 8.—एकैकम् 'every day one;' compare below p. 9. L. 14 and p. 10. L. 2.

P. 9. L. 12.—यः must be understood.

P. 9. L. 16.—वाडवः scil. अग्निः. The fire banished by Aurva into the ocean dries up a space of 12 Kros'as incircumference.

P. 9. L. 18.—Metre of s'loka 26: Upajáti.

P. 9. L. 20.—दर्श्यमानम् 'just that which has been pointed out (to him by his strong friend as desired.)'

P. 9. L. 23.—समुत्पन्ने अर्थे against the Sandhi-rules. Similar cases occur frequently in epic poetry, in the Smritis and in the verses of the Panchatantra. Compare e. g. below p. 17. l. 15, p. 25. l. 5. and passim.

P. 10. L. 7.—मत्वा=ज्ञात्वा occurs frequently in our redaction of the Panchatantra, as well as in epic poetry and still older works.

P. 10. L. 9.—पक्ष 'family, race.'

P. 10. L. 12.—कवलित lit. 'made mouthfuls of' *i. e.* 'eaten one by one.'

P. 10. L. 16.—मयावस्थितेन instr. absolute. In this construction the instr. originally expresses 'the reason' 'हेतु.'

Digitized by Google

P. 10. L. 23.—परिचितम् in the sense of an abstract noun.

P. 11. L. 4.—अन्तरे विधृ 'to pledge.'

P. 12. L. 7.—क्षाम 'parched.'

P. 13. L. 1.—दोष 'bad luck.'

P. 13. L. 11.—Construe कौतुकं (भाति) यन्न द्रवति तासां दृक्संगमं प्राप्य. द्रवति 'one does not melt.'

P. 13. L. 16 बलात् 'by force *i. e.* against thy will.'

P. 14. L. 2.—चर् 'to graze.' Some examples of this meaning of the root, which is the common one in Maráthí occur already in the older Sanskrit writers.

P. 14. L. 14.—Metre of s'loka 34: S'árdúlavikrídita.

P. 14. L. 16.—नग्नीकृता मुण्डिताः, these two words describe the Jaina and Banddha ascetics —रक्तपटीकृताः '(have been) dressed in red rags.' Red clothes are the marks also of Smárta ascetics. कापालिकाः 'scull-wearers.' This is name of certain disreputable worshippers of Devi. See H. H. Wilson, Works vol. I. p. 21 and 264. The verse sarcastically represents asceticism as a consequence of the anger of Cupid.

P. 14. L. 21.—किं=किंचित्.— कथम् '(else) how.'

P. 15. L. 1.—अपि 'then.' It is frequently used in this sense in the Panchatantra.

P. 15. L. 2.—प्रतर्पितपितृगणः refers to the performance of the (नित्य) S'ráddha.

P. 16. L. 3.—तेन 'for that reason.'

P. 16. L. 4.—राजपुत्राः 'warriors, (Rájputs).'

P. 16. L. 15. चन्द्रार्धः instead of the more common अर्धचन्द्रः occurs also in epic poetry.—अर्धचन्द्रं दा 'to seize by the neck (and turn out).'

P. 18. L. 2.—भग्न 'put to flight.'

Digitized by Google

P. 20. L. 15.—Metre of s'loka 47: A'ryá.

P. 21. L. 5.—Metre of s'loka 50: S'ikhariní.

P. 21. L. 6.—Regarding the story of the birth of Vyása, the son of Satyavatí and Parás'ara and other stories alluded to in this verse see Mahábhárata I., 2370 sqq.

P. 21. L. 9.—कुलानामिति 'what regards the statement of s'loka 49 that the history) of noble families (ought not to be examined too closely)'.....स्त्रीणामिति must be translated similarly.

P. 21. L. 17.—The connexion of p. 21. l. 1—16 seems to be this. The carpenter at first doubts, whether it will be proper to try his wife. He quotes s'lokas 49 and 50 against the undertaking. But s'loka 51, reminds him of the wickedness of women in general, and the remembrance of the gossip which has come to his ears (l. 14) confirms him in his first resolution.

P. 21. L. 21.—Metre of s'loka 53: A'ryá.

P. 22. L. 2.—कंचिद्विटगृहम् double accusative of person and place depending upon गत्वा.

P. 22. L. 23.—Construe प्रतीकारः सन्नपि नास्ति यतस्त्वया स आयत्तः [त्वं च तमुपयोक्तुं नाङ्गीकरिष्यसीति शेषः]

P. 23. L. 3.—अपमृत्यु 'untimely death.'

P. 23. L. 6.—निश्चय 'firm belief.'

P. 23. L. 15.—छन्देन lit: 'by the will *i. e.* according to, to.'

P. 23. L. 23.—पौरुष 'disposition.'

P. 24. L. 4.— स्वयोनिम् bahuvríhi compound.

P. 24. L. 22.—अन्न 'cooked food' especially rice.

P. 25. L. 1.—प्रदुष्यति *i. e.* दोषं जनयति.

P. 25. L. 8.—प्रशस्यते 'is declared to be best' *i. e.* in the S'ástras.

Digitized by Google

P. 25. L. 10.—सुहृन्मित्र 'relations and friends.'

P. 25. L. 11.—विशिष्यते 'is preferable' (for saints etc.)

P. 25. L. 16.—After मुञ्च मुञ्च [इत्युक्ते सति प्रथमेन] must be understood, and after सर्वार्थसाधनम् [इति तृतीयश्चिन्तयति स्म.]

P. 25 L. 22.—पोतिका 'a cloth.'

P. 26. L. 14.—संचर् 'to infect.'

P. 27. L. 16 — तैर्गुणैः । विवाहात्पूर्वं रजःस्रवणजनितैरधर्माख्यैरिति *i. e.* 'through the demerit produced thereby.'

P. 28. L. 19.—उत्तम : 'very much superior.' Below, this and other superlatives are frequently to be translated in the same manner.

P. 29. L. 2.—श्रेष्ठतरः see below p. 56. l. 8 note.

P. 30. L. 11.—Metre of s'loka 77 : Vasantatilaká.

P. 30 L. 16.—Metre of s'loka 78 : S'árdúlavikrídita.

P. 30. L. 19.—The accusative पुरुषम् is governed by हा. See Siddhántakaumudí I. p. 262.

P. 31. L. 17.—अतिरिच्यते 'surpasses viz. in desolateness' *i. e.* 'is more desolate.'

P. 32. L. 11.—विषमया : for विषमस्य : The latter would be the correct form according to Páṇini (Siddhántakaumudí I. p. 215) as the affix मय is technically टित्, मयट्. The fem. in आ is however, not uncommon in the later Sanskrit works, see the Petersburg Dict. s. v. मय.

P. 32. L. 20.—बालः 'a fool.'—विकल्प् 'imagine (to find).'

P. 33. L. 2.—निरीक्षसि against the rules of Páṇini. The use of the root ईक्ष् in the Parasmaipada is, however, common also in epic poetry.

P. 35. L. 2.—भेद 'creating discord' and दान 'bribery' belong to the means of success,' recommended by the Hindu

Digitized by Google

níti. See below s'loka 109 and also Tantra III., the speeches of the ministers of Arimardana.

P. 35. L. 19.—कदाचित् = कस्मिंश्चित्.

P. 37. L. 11.—शुचीभूय before making a solemn gift, the giver touches water or bathes. See Nilakanthás Dánamayúkha, Sect. III. Dátṛikrityáni, where a passage from the Váráha P. on this point, is quoted. तिसृभिर्वाचाभिः 'pronouncing three words *i. e.* repeating, the words 'I give' three times, in order to make the act more solemn.

P. 38. L. 3.—वचनसहायः 'a person to talk to.'

P. 38. L. 12.—राजपुरुषपदैरेव 'following closely the king's servants.'

P. 38. L. 14.—दायाद See above note to p. 6. l. 14.

P. 38. L. 19.—निवेदितः 'denounced.'

P. 38. L. 23.—त्रिवाचिकम् see above p. 37. L. 11.

P. 40 L. 3.—द्रम्माः ('a great deal of) money.' The word द्रम्म is changed from the Greek Drakhmé; a Dramma in value is equal to four annas or six pence. 20 varáṭakas (cowries)= 1 kákiṇi; 4 kákiṇis = 1 paṇa; 16 paṇas = 1 dramma; 16 drammas = 1 nishka.

P. 40. L. 8.—निवेद्य 'gave and.'

P. 40. L. 22.—उल्लङ्घयित्वा 'jumping up'; an ungrammatical form see Benfey gr. § 176 M. Müller gr. § 445. Similar interchanges of the affixes of the absolutive are not uncommon in the Vedas and epic poetry e. g. अभिवादयित्वा, निवेदायित्वा see Benfey vollstaendige grammatik § 915 Bem. 2.

P. 41. L. 4.—सप्तपद '(to be) gained by seven steps.' The expression is explained by the 'seven steps' which the

Digitized by Google

bride has to make at the marriage ceremony, and through which the marriage become binding.

P. 42. L. 3.—Metre of s'loka 110: A'ryá. शिखिन् = अग्नि. मुक्तमुक्त karmadháraya comp.

P. 42. L. 12.—S'loka 110 has a double sense. It applies not only to the pearl, but also to the man who seeks salvation (मौक्तिक). If the verse is taken in the latter sense, अत्यच्छ means सात्त्विक, अन्तर्भिन्न refers to the non-recognition of the unity of the individual soul and of Brahma, and निबन्धन means as much as संसारसंबन्ध.

P. 43. L. 17.—दिशोभाजम्. दिशस् fem., a rare form for the usual दिश् or दिशा.

P. 43. L. 20.—संपन्नम् = संपत्तिः

P. 43. 23.—शिथिलाः 'careless.'

P. 44. L. 5.—सरमाया अपत्यं सारमेयः Saramá is in Vedic mythology the bitch of the Gods, that assisted in the recovery of the cows of the Angiras from the Panis.

P. 45. L. 6.—पाटलिपुत्र, is the old name of Patna, once the capital of Magadha or Bihár. If *here* the same town is meant, the writer must have been a very bad geographer, as Magadha does not belong to the Dekhan. Other reductions of the Panchatantra name instead of Pátaliputra, Mahiláropya, which was a southern town.

P. 45. L. 11.—Metre of s'lokas 2—10: A'ryá.

P. 45. L. 20.—न विभाव्यन्ते..... पुरेपिनिवसन्तः '(the existence of) small.....is not recognised, though they dwell before (the eyes of their richer neighbours.)'

P. 46. L. 3.—पूर्वसुकृतं पूर्वजन्मनि सुकृतमिति. विकलम् lit. 'defective *i. e.* inefficient, useless.'—A new sentence begins with विद्यावन्तः.

Digitized by Google

P. 46. L. 5.—Construe पतिं पयसा गर्जन्तमपि—लोको नाह लघुरयमिति.

P. 46. L. 9.—पद्मनिधि 'a treasure having the value of a Padma *i. e.* 100,000,000 pieces of money. क्षपणक 'A Buddhist monk.' Etymology [दोषान्] क्षपयतीति क्षपणः The affix क shows that the adjective has become an appellative.

P. 46. L. 11.—पूर्वपुरुषोपार्जितः "collected by thy ancestors (and concealed by them)."

P. 47. L. 3.—नग्नक 'an ascetic' here, of course, a Bauddha.

P. 47. L. 6.—विहार 'a monastery.' जिनेन्द्रस्य "around (the statue of) the lord of the Jinas, *i. e.* of Buddha." The Jinas are the Buddhas, 'who have triumphed over the enemy,' (see Burnouf Introduction à l'hist. du Bouddhism p. 204) and the appellation 'lord of the Jinas' is frequently given to S'ákyamuni in Buddhist works. Statues of the various Buddhas are the usual objects of worship amongst the Buddhists and the chapel of the Vihára, to which the barber went, necessarily possessed one. Regarding the various Buddhas enumerated by Buddhist writers see Hodgson Illustr. of the Rel. of the Buddhists p. 46 sqq.

P. 47. L. 9.—जयन्ति = जयन्तु. Compare the phrase जयति जयति देवः which so frequently occurs in the Sanskrit dramas. The pres. indic. is used for the imper. in wishes made by inferiors for the welfare of superiors, in order to be more complimentary. Compare the Latin exhortations, 'fac, ut fecisti' etc. केवलज्ञान denotes here, as commonly in the phraseology of the Jainas, the highest knowledge which leads to salvation (ग्रन्थभिद्).

P. 47, L. 10.—येषाम्—ऊषरायितम् "whose souls, from their birth have become like a salt-desert *i. e.* unfit for the pro-

Digitized by Google

ductions of desires." Regarding उपरावितम् compare अनलायितम् Petersburg Dict. s. v.

P. 47. L 15.—Metre of s'loka 14: S'árdúlavikrídita.—मार, lit. the slayer, is with the Bauddhas a name of the Evil one, of the devil, (see the Petersburg Dict s. v.). His creatures, the मारवश्वः, address the Jina, who sits lost in meditation, and try in vain to seduce him. By his resistance to their wiles he proves his greatness.—नो = न.

P. 47. L. 20.—लब्धधर्मवृद्ध्याशीर्वादः The salutation of a Bauddha priest, is धर्मो वर्धताम्.

P. 48. L. 1.—तत्कालपरिचर्यया 'in search of the instantaneous hospitality (of our pupils)'

P. 50. L. 19.—निर्वापः 'alms.'

P. 51, L. 9.—Metre of s'loka 23: Vamś'astha.

P. 51. L. 16—साधुसुवंशजा Karmadháraya compound. नो = न is to be taken with भजते and यान्ति in the sense of अपगच्छन्ति न्यायारोपितविक्रमाणि 'from whom powerful assistance might be justly be expected.' Metre of s'loka 24: S'árdúlavikridita.

P. 51. L. 18.—Metre of s'loka 25 : Indravajrá.

P. 51. L. 22.—Metre of s'loka 26 : Vasantatilakà.

P. 52. L. 2.—वाघः 'a corpse.'

P. 52 L. 6 —Metre of s'loka 27: Vasantatilaká.

P. 52. L. 11. महाकाल, the name of a famous Linga, one of the twelve Jyotirlingas, enumerated in the Puránas, and of its temple near Ujjain. It is frequently mentioned in the Sanskrit story books, such as the Kathásaritságara and the Das'akumáracharita. According to the Arabic writers, it was consecrated about 930 A. D. and destroyed by Allumshah in 1231, see H. H. Wilson works I. p. 223.

Digitized by Google

P. 52. L. 14.—सिद्धियात्रिकाः 'wandering about in order to learn magic arts.'

P. 52. L. 17.—Metre of s'lokas 28, 29, 30: A'ryá.

P. 52. L. 18.—भलम्, 'sufficiently,' qualifies अवसरतुलिताभिः.

P. 52. L. 23.—अदृष्ट 'the invisible one' is the quality of the soul produced by meritorious or sinful acts (धर्म and अधर्म). This quality, *i. e.* the merit or demerit, acquired during the preceding existence determines man's good or evil fortune in the following life.

P. 53. L. 1.—Metre of s'loka 31: A'ryá. Construe गुरूंलोकान् with भयम्; गुरुलोकः 'powerful men.' After प्राणान्, तृणमिव तुलयन्ति must be repeated.

P. 53. L. 3.—Metre of s'loka 32: A'ryá. मधुभित् 'The destroyer of the (demon) Madhu *i. e.* Vishṇu. मथनायस्तैः refers to the churning of the ocean, at which occasion Lakshmí was born and chose Vishṇu for her husband.

P. 53. L. 5.—Metre of s'loka 33: A'ryá. The verse gives a joking explanation for the fickleness of Fortune (Lakshmí). जलगत: refers to the sleep of Vishṇu in the ocean, where he is represented as reposing on the serpant S'esha.

P. 53. L. 7.—पर 'an enemy.' तुला has a double sense. It means the sign of Libra,' which the sun enters in autumn at the end of the Monsoon, and the phrase तुलामधिरूढ़ has also the meaning 'to become equal to (by strenuous exertion.)'

P. 53. L. 9.—शाकिनी 'a female demon.'—महामांस human flesh or that of cows, horses, elephants, bears, buffalows, camels and snakes, as offered by the S'áktas to Deví.—साधकवर्ति 'a magic wick.'

P. 53. L. 14.—बहपाय 'a very powerful.'

Digitized by Google

P. 54. L 9.—उत्तमम् see above note to p. 28. l. 9.

P. 55. L. 2. वीणावन्त see H. H. Wilson Works IV. 60.

P. 55. L. 7.—धनद 'Kuvera.'

P. 56. L. 8.—ज्येष्ठतर 'the eldest.' The irregular addition of तर to a superlative base finds its parallel in the श्रेष्ठतर see above note to p. 29. l. 2.

P. 56. L. 15.—केवला 'belonging to one man only.'

P. 57. L. 20.—कन्यकुब्ज 'Kanoj.' Regarding the form compare note to p. 6. l. 9.

P. 57. L. 20.—उत्कलापयित्वा 'having asked (our teacher) for permission to go.' It is an irregular form of the causal of the root कल् with उद्, formed in the manner of the Prakrit causals. Other analagous forms as मुञ्चापयति, मोचापयति, जीवापयति in the Panchatantra and other story books. [Benfey Panchatantra II. 520.] Regarding the irregular use of the affix त्वा compare note to p. 40. l. 22.

P. 58. L. 6.—The verse is said to be from the Mahábhárata and runs thus : तर्कोप्रतिष्ठः श्रुतयो विभिन्ना नैको मुनिर्यस्य वचः प्रमाणम् । धर्मस्य तत्त्वं निहितं गुहायां महाजनो येन गतः स पन्थाः ॥

P. 58. L. 7.—मेलापक 'company,' a Prakritic form.

P. 58. L. 15.—The whole s'loka runs thus :—क्षणं चित्तं क्षणं वित्तं क्षणं जीवति मानवः । यमस्य करुणा नास्ति धर्मस्य त्वरिता गतिः ॥

P. 59. L. 5.—सूत्रिका 'Maccaroni,' now called in Maráthí शेंवई. They are made of wheaten flour.

P. 59. L. 7.—मण्डक, now called मांडा in Maráthi, is a kind of large, very thin cakes, made of wheaten flour and sugar.

P. 59. L. 9.—वटिका, now called अंबोळी in Maráthí, is a kind of cake, made of rice and Udíd (Másha). It is pierced with numerous little holes.

Digitized by Google

P. 59. L. 13.—Remove stop between स्थितः and ततः; the sentence ends only with उपगतः.

P. 59. L. 19.—Metre of s'loka 44: Vaṁsástha.

P. 61. L. 1—Vishṇugupta Cháṇakya assisted Chandragupta, the cotemporary of Alexander the Great, to gain the throne by destroying the dynasty of the Nandas. See H. H. Wilson, Hindu Theatre, II. p. 127—150, S. G. Turnour, Mahàvanso, Introduction p. xxxix, s. qq.

P. 62. L. 4.—लक्षण 'a reward.'

P. 62 L. 19.—काशिन् 'one who has the cough.'

P. 63. L. 8—13.—मूर्छना 'scale.'—ग्राम 'octave.'—तान 'a quaver.' स्थानत्रयं यतीनाम् 'three are the positions of the pauses' *i. e.* two in the middle and at the end of each common verse and the third in the alliterative verse before the alliteration. श्रुतेः परम् 'depending upon the intervals called s'ruti.' Each note consists of a certain number of s'rutis, *i. e.*, Sha = 4, Ri = 3, Ga = 2, Ma = 4, Pa = 4, Dha = 3, Ni = 2. भरत, is the reputed author of the second work on music. I am unable to make out the total of the 185 Angas or parts required in music from this reading or from any of the various readings to the passage, known to me.

P. 64. L. 21.—व्यन्तर 'a sprite.'

P. 65. L. 22.—भार्गव *i. e.* Us'anas, who is one of the reputed writers on Níti

P. 66. L. 14.—यानेत्यादि six lines of conduct, to be observed in high politics. Full details in the beginning of the third Tantra

Digitized by Google

P. 66. L. 17.—Metre of s'loka 67 : Upendravajrá.

P. 66. L. 20.—Metre of s'loka 68 : S'árdúlavikríḍita. The Vṛishṇis, a subdivision of the Yádavas were destroyed by internal dissensions in the times of Kṛishṇa, see Harivaṁsa, adhyáya 40. अर्जुन, the son of Kṛitavírya, was slain by Paras'uráma.

P. 67. L. 18.—आशापिशाचिका 'a cruel and delusive hope.'

P. 68. L. 2.—भुक्तोर्वरितैः 'remaining after the dinner.'

P. 68. L. 3.—नागदन्त 'a peg fixed in the wall.'

P. 68. L. 12.—चतुःशालं गृहम् 'a house, which has a court in the middle and rooms on all four sides.' This is the plan, on which the better kind of Hindu houses are usually built.

P. 69. L. 11.—Us'anas, Bṛihaspati and Chánakya are said to have been the three most famous writers on Níti.

P. 70. L. 1.—S'álihotra is the name of an ancient writer on veterinary surgery, see also below p. 71. L. 13. Fragments of his writings are preserved in the Sárasamuchchhaya of Kalhaṇa, a modern work on the same subject.

P. 70. L. 21.—Remove the stop after सुखम् and take the whole as one sentence.

P. 71. L. 22.—अनृणताकृत्येन 'in order to pay him out.'

P. 72. L. 1.—वंशजाम् 'committed against one's family.'

P. 74. L. 11.—वटे वानर इति वटवानरः ॥

P. 74. L. 17.—क्व यास्यसि 'what will become of thee (if etc.)?' S'loka 87 contains the answer to this question.

P. 75. L. 21.—अश्वतम 'the best horse.' The affixes तर and तम may be added to substantives also.

P. 77. L. 3.—Metre of s'loka 90 : Indravajra.—त्रिकूट, 'a mountain in Ceylon.'—Us'anas or S'ukra was, according to

Digitized by Google

Hindu mythology, the teacher of the Daityas and composed for them his Nítis'ástra.

P. 77. L. 8.—कर्मन् 'fate,' because the acts of man produce merit or demert *i. e.* the apúrva guṇa, and this determines his good or bad fortune in his next life. संमुख 'favourable.

P. 77. L. 11.—मधुपुर *i. e.* Mathurá.

P. 77. L. 18.—Metre of s'loka 92 : Upagíti.

P. 79. L. d4.—Metre of s'loka 97 : Mandákrantá.

P. 81. L. 2.—वाष्प 'steam.'

P. 81. E. 21.—The fabulous birds, called भारण्ड or भारुण्ड live, according to the Hindu writers, in the country of the Uttarakurus, the Indian Hyperboreans.


P. 83. L. 6.—द्वितीयः 'a companion.'

Digitized by Google

Digitized by Google

Digitized by Google





Digitized by Google

Digitized by Google